दुर्लभ स्तोत्राणि

संकलनकर्ता : श्री राधारमण दूर्वार

—: प्रकाशक :—

श्री पीताम्बरा पीठ, दतिया (म. प्र.)

माता पीताम्बरा बगलामुखी, दतिया (म. प्र.)



सौवर्णासनसंस्थितां त्रिनयनां पीतांशुकोल्लासिनीं ।
हेमाभाङ्गरुचिं शशाङ्कमुकटां सच्चम्पकस्रग्युताम् ॥
हस्तैर्मुद्गरपाशवज्ररसनां संविभ्रतीं भूषणैर्व्याप्ताङ्गीं ।
बगलामुखीं त्रिजगतां संस्तम्भिनीं चिन्तयेत् ॥

ब्रह्मलीन
श्री पीताम्बरा पीठाधीश्वर राष्ट्रगुरु परमपूज्य श्री अनन्तश्री श्री स्वामी जी महाराज, वनखण्डेश्वर, दतिया (म. प्र.)

ऋण हरण गणपति स्तोत्र

अस्य श्री ऋणहरण कर्तृ गणपति स्तोत्र मंत्रस्य सदाशिव ऋषि: अनुष्टुप छन्द: श्री ऋणहर्तृ गणपति देवता ग्लौं बीजं ग: शक्ति: गौं कीलकम् मम सकलर्ण नाशने जपे विनियोग:।

ॐ सदाशिव ऋषये नम: शिरसि।
ॐ अनुष्टुप छन्दसे नमो मुखे।
ऋण हर्तृ गणेश देवतायै नम: हृदि।
ग्लौं बीजाय नम: गुह्ये
ग: शक्तये नम: पादयो:।
गौं कीलकाय नम: सर्वाङ्गे.।

हृदयादिन्यास:-

ॐ गणेश	अंगुष्ठाभ्यां नम:।	हृदयाय नम:।
ऋणं छिन्धि	तर्जनीभ्यां नम:।	शिरसें स्वाहा।
वरेण्यं	मध्यमाभ्यां नम:।	शिखायै वषट्।
हुं	अनामिकाभ्यां नम:।	कवचाय हुं।
नम:	कनिष्ठिकाभ्यां नम:।	नेत्रत्रयाय वौषट्।
फट्	करतलकरपृष्ठाभ्यां नम:।	अस्त्राय फट्।

ध्यानम् : ॐ सिन्दूरवर्ण द्विभुजं गणेशं लम्बोदरं पद्मदले निविष्टम्।
ब्रह्मादि देवै परिसेव्यमानं सिद्धैर्युतं तं प्रणमामि देवम्।।

जप मन्त्र:- ॐ गणेश ऋणं छिन्धि वरेण्यं हुं नम: फट्।।

स्तोत्र – सृष्ट्यादौ व्रह्मणा सम्यक् पूजिता फल सिद्धये
सदैव पार्वती पुत्र ऋणनाशं करोतु मे ।।1।।
त्रिपुरस्य वधात्पूर्वं शम्भुना सम्यगर्चित:
सदैव पार्वती पुत्र ऋणनाशं करोतु में ।।2।।
हिरण्यकस्यप्वादीनां वधार्थे विष्णुनार्चित:
सदैव पार्वती पुत्र ऋणनाशं करोतु मे ।।3।।
महिषस्य वधे देव्या गणनाथ प्रपूजित:

प्रकाशक : श्री पीताम्बरापीठ
दतिया (म.प्र.)

मूल्य : १० रूपये

प्रतियाँ : ३०००

मुद्रक : शिवशक्ति प्रेस प्रा. लि.,
ग्वालियर रोड, झांसी।

प्रक

सगुणोप
करना बड़ा ह
शक्तियों का
कृत्य हो जाता
हैं। स्तोत्र पाठ
विधि पूर्वक
उपासना में तो
है।

स्तोत्र
पीठ द्वारा अने
और अलभ्य,
पुनः प्रकाशित
ही रहस्यमय
है साधक वृन्द
प्राप्त कर ला

श्रावण
४ अग

प्रकाशकीय (द्वितीय संस्करण)

सगुणोपासना में देवताओं का स्तवन, स्तुति गायन एवं स्तोत्र पाठ करना बड़ा ही उपयोगी होता है। स्तोत्र पाठ करने से देवता में निहित शक्तियों का प्रस्फुरण होता है, साधक देवता की कृपा प्राप्त कर कृत कृत्य हो जाता है। देवत्व के भाव जागरण में स्तोत्र पाठ बड़े ही उपयोगी हैं। स्तोत्र पाठ न केवल साधक को भाव विभोर ही करते हैं अपितु विधि पूर्वक अनुष्ठान करने से अभीष्ट की प्राप्ति भी कराते हैं। शक्ति उपासना में तो मंत्र जाप के साथ साथ स्तोत्र पाठ करने का भी विधान है।

स्तोत्र पाठ साधना के महत्व को दृष्टि में रखते हुए श्री पीताम्बरा पीठ द्वारा अनेकानेक स्तोत्र प्रकाशित किये गये हैं। इसी क्रम के कुछ और अलभ्य, अप्रकाशित साधना उपयोगी स्तोत्रों का एक लघु संस्करण पुनः प्रकाशित किया जा रहा है। ''दुर्लभ स्तोत्राणि'' इस संग्रह में बड़े ही रहस्यमय साधना उपयोगी स्तोत्रों का संकलन किया गया है। आशा है साधक वृन्द इन स्तोत्रों का पाठ, अनुष्ठान विज्ञ साधकों से मार्ग दर्शन प्राप्त कर लाभान्वित होंगे।

श्रावणी
४ अगस्त, २००१

मंत्री
श्री पीताम्बरा पीठ दतिया (म.प्र.)

दुर्लभ स्तोत्राणि

*

संकलनकर्ता : श्री राधारमण दुर्वार

-: प्रकाशकः-
श्री पीताम्बरापीठ दतिया (म.प्र.)

ब्रह्मलीन
श्री पीताम्बरा पीठाधीश्वर राष्ट्रगुरु परमपूज्य श्री अनन्तश्री श्री स्वामी जी महाराज, वनखण्डेश्वर, दतिया (म. प्र.)

सदैव पार्वती पुत्र ऋणनाशं करोतु मे ।।4।।

तारकस्य बधात्पूर्व कुमारेण प्रपूजित:

सदैव पार्वती पुत्र ऋणनाशं करोतु मे ।।5।।

भास्करेण गणेशोहि पूजितच्छवि सिद्धये

सदैव पार्वती पुत्र ऋणनाशं करोतु में ।।6।।

शशिना कान्तिवृद्ध्यर्थ पूजितो गणनायक:।

सदैव पार्वती पुत्र ऋणनाशं करोतु में ।।7।।

पालनाय च तपसां विश्वामित्रेण पूजित:।

सदैव पार्वती पुत्र ऋणनाशं करोतु में ।।8।।

फलश्रुति– इदं ऋणहरस्तोत्रं तीव्र दारिद्र्य नाशनम्।

एकवारं पठेन्नित्यं वर्षमेकं समाहित: ।।9।।

दारिद्र्य दारूणं त्यक्त्वा कुवेर समतां व्रजेत्।

फडन्तो य महामन्त्र: सार्द्धपञ्चदशाक्षर: ।।10।।

इमं मन्त्रं पठेदन्ते ततश्च शुचि भावन: ।

एकविंशति संख्याभि: पुरश्चरणमीरितम् ।।11।।

सहस्त्रावर्तना सम्यक् षण्मासं प्रियतां व्रजेत्।

बृहस्पति समोज्ञाने धने धनपतिर्भवेत्।।12।।

अस्यैवायुत संख्याभि: पुरश्चरणमीरितम्।

लक्षमावर्तनात्सम्यक् वाञ्छितं फलमाप्नुयात्।।13।।

भूत प्रेत पिशाचानां नाशनं स्मृति मात्रत: ।।14।।

इति कृष्णयामल तन्त्रे ऋणहरणकर्तृ गणेशस्तोत्र समाप्तम्।।

* * *

हरिद्रा गणेश कवच

श्रृणु वक्ष्यामि कवचं सर्व सिद्धिकरं प्रिये।
पठित्वा पाठयित्वा च मुच्यते सर्व संकटात्।।1।।
अज्ञात्वा कवचं देवि गणेशस्य मनुं जपेत्
सिद्धिर्न लभते तस्य कल्प कोटि शतैरपि।।2।।
ॐ आमोदश्च शिरः पातु प्रमोदश्च शिखोपरि।
सम्मोदो भ्रूयुगे पातु भ्रूमध्ये च गणाधिपः।।3।।
गणक्रीडश्चक्षु युग्मं नासायां गणनायकः।
गणक्रीडान्वितः पातु वदने सर्व सिद्धये।।4।।
जिव्हायां सुमुखः पातु ग्रीवायां दुर्मुखः सदा।
विघ्नेशो हृदये पातु विघ्ननाशश्च वक्षसि।।5।।
गणानां नायकः पातु वाहुयुग्मे सदामम्।
विघ्नकर्त्ता च उदरे विघ्नहर्त्ता च लिङ्गके।।6।।
गजवक्त्रा कटिदेशे एकदन्तो नितम्विके।
लम्बोदरः सदापातु गुह्यदेशे ममाऽरूणः।।7।।
व्यालयज्ञोपवीती मां पातु पादयुगे सदा।
जापकः सर्वदा पातु जानु जङ्घे गणाधिपः।।8।।
हरिद्रा सर्वदा पातु सर्वाङ्गे गणनायकः।
य इदं प्रपठेन्नित्यं गणेशस्य महेश्वरि।।9।।
कवचं सर्व सिद्धाख्यं सर्वविघ्न विनाशनम्।
सर्वसिद्धिकरं साक्षात् सर्वपाप विमोचनम्।।10।।
सर्वसम्पत्प्रदं साक्षात् सर्व पाप विमोचनम्।
सर्व सम्पत्प्रदं साक्षात् सर्व शत्रु क्षयङ्करम्।।11।।
ग्रहपीडा जरा रोगा ये चाऽन्ये गुह्यकादयः।
पठनाद्धारणादेव नाशमायान्ति तत्क्षणात् ।।12।।
धन धान्य करं देवि कवच सुरपूजितं।
समो नाऽस्ति महेशानि त्र्यैलोक्ये कवचस्य च ।।13।।
हारिद्रयस्य महेशानि कवचस्य च भूतले।
किंमन्यैरसदालापैर्यलाऽयुर्व्ययतामियात् ।।14।।
इति विश्वसार तन्त्रोक्त हरिद्रगणेश कवचं समाप्तम्।।

* * *

दारिद्र्य दहन शिवस्तोत्र

विश्वेश्वराय नरकार्णवतारणाय
कर्णामृताय शशिशेखर धारणाय
कर्पूरकान्ति धवलाय जटाधराय
दारिद्र्य दु:ख दहनाय नमः शिवाय ।।1।।
गौरीप्रियाय रजनीश कलाधराय
कालान्तकाय भुजगाधिप कङ्कणाय
गङ्गाधराय गजराज विमर्दनाय
दारिद्र्य दु:ख दहनाय नमः शिवाय ।।2।।
भक्तिप्रियाय भवरोग भयापहाय
उग्राय दुर्गभवसागर तारणाय।
ज्योतिर्मयाय गुणनामसुनृत्यकाय
दारिद्र्यदु:ख दहनाय नमः शिवाय ।।3।।
चर्माम्विराय शवभस्म विलेपनाय
उग्राय दुर्ग भवसागर तारणाय।
मञ्जीरपाद युगलाय जटाधराय
दारिद्र्य दु:ख दहनाय नमः शिवाय ।।4।।
पञ्चाननाय फणिराज विभूषणाय
हेमांशुकाय भुवनत्रय मण्डिताय
आनन्द भूमि वरदाय तमोमयाय
दारिद्र्य दु:ख दहनाय नमः शिवाय ।।5।।
भानुप्रियाय भवसागर तारणाय
कालान्तकाय कमलासन पूजिताय।
नेत्रत्रयाय शुभलक्षण लक्षिताय
दारिद्र्य दु:ख दहनाय नमः शिवाय ।।6।।
रामप्रियाय रघुनाथवरप्रदाय
नागप्रियाय नरकार्णव तारणाय
पुण्येषु पुण्यभरिताय सुरार्चिताय
दारिद्र्य दु:ख दहनाय नमः शिवाय ।।7।।

मुक्तेश्वराय फलदाय गणेश्वराय
गीतप्रियाय वृषभेश्वर वाहनाय।
मातङ्गचर्म वसनाय महेश्वराय
दारिद्र्य दुःख दहनाय नमः शिवाय ।।8।।

वशिष्ठेन कृतं स्तोत्रं सर्वरोग निवारणम्।
सर्व सम्पत्कवं शीघ्रं पुत्र पौत्रादि वर्द्धनम्।।
त्रिसन्ध्यं यः पठेन्नित्यं स हि स्वर्गमवाप्नुयात्।।

* * *

अभिलाषाष्टक

विश्वानर उवाच-

एकै व्रह्मैवाद्वितीयं समस्तं सत्यं सत्यं नेह नान्यास्ति किंचित्।
एको रूद्रोवाद्वितीयोऽवतस्थेतस्मादेकं त्वां प्रपद्ये महेशम्।।
एक: कर्त्तात्वं हि विश्वस्य शंभो नानारूपेष्वेकरूपोऽस्य रूप:।
यद्वत्तपत्यर्क रूपोऽप्यनेकस्तस्मान्नान्यं त्वां दिनेशं प्रपद्ये ।।
रज्जौ सर्प: शुक्तिकायां च रौप्यं नैरे पुरस्तन्मृगाख्येमरीचौ।
यद्वत्तद्वद्विष्वगेष प्रपंचौ यस्मिन् ज्ञाते तं प्रपद्ये महेशम्।।
तोये शैत्यं दाहकत्वं च वह्नौ तापो भानौ शीत भानौ प्रसाद:।
पुष्पे गन्धौ दुग्धमध्ये च सर्पिर्यत्तच्छंभोत्वं ततस्त्वां प्रपद्ये ।।
शब्दं गृहणास्य श्रावस्त्वं हि जिघ्रस्य घ्राणस्त्वं व्यंघ्रिरायासि दूरात।
व्यक्ष: पश्येस्त्वं रसज्ञोऽत्यजिह्व: कस्त्वां सम्यग्वेत्यतस्त्वां प्रपद्ये ।।
नो वेदस्त्वामीश साक्षाद्धि वेद नो वा विष्णुनो विधाताखिलस्य ।
नो योगीन्द्रा नेद्रमुख्याश्च देवा भक्तो वेद त्वामतस्त्वां प्रपद्ये ।।
नो ते गोत्रं नापि जन्मापि नाख्या नो वा रूपं नैव शीलं न देश:।
इत्थंभूतोऽपीश्वरस्त्वं त्रिलोक्या: सर्वान्कामान्पूरयेस्तदभ्जे त्वाम् ।।
त्वत्त: सर्वत्वं हि सर्व स्मरारेत्वं गौरीशस्त्वं च नग्नोऽतिशान्त:।
त्वं वै वृद्धस्त्वं युवा त्वं च वालस्तत्किं यत्त्वं नास्यतस्त्वां नतोस्मि ।।
स्तुत्वेति भूमौ निपपात विप्र: स दंडवद्यावदतीव हृष्ट: ।
तावत्स वालोऽखिलवृद्धवृद्ध: प्रोवाच भूदेव वरं वृणीहि ।।

ततउत्थाय हृष्टात्मा मुनिर्विश्वानर: कृती।
प्रत्यव्रवीत्किमज्ञातं सर्वज्ञस्य तव प्रभो।।
सर्वान्तरात्मा भगवान् शर्व: सर्वप्रदो भवान्।
याञ्चा प्रतिनियुंक्ते मामयशोदैन्य कारिणी।।
इति श्रुत्वा वचस्तस्य देवा विश्वानरस्य ह ।
शुचे शुचि व्रतस्याथशुचि: स्मित्वा ब्रवीच्छिव: ।।

वाल उवाच-

त्वया शुचे शुचिष्मत्यां योऽभिलाष: कृतोहृदि।
अभिरेणैव काले वत्स भविष्यत्यसंशय:।।

तव पुत्रत्वमेष्यामि शुचिष्मत्यां महामते।
ख्यातो गृहपतिर्नाम्ना शुचिः सर्वामरप्रियः ।।
अभिलाषाष्टकं पुण्यं स्तोत्रमेतत्वयेरितम्।
अर्ब्द त्रिकाल पठनात्कामदं शिव सन्निधौ ।।
एतत्स्तोत्रस्य पाठं तु पुत्र पौत्र धनप्रदम्।
सर्व शान्ति करं वापि सर्वापत्यरिनाशनम् ।।
स्वर्गापवर्ग सम्पत्तिकारकं नात्र संशयः ।।
प्रातरूत्थाय सुस्नानो लिंगमभ्यर्च्य शांभवम् ।।
वर्ष जपन्निदं स्तोत्रमपुत्रः पुत्रवान्भवेत् ।
वैशाखे कार्त्तिके माघे विशेष नियमैर्युतः ।।
यः पठेत्स्नान समये लभते सकलं फलम्।
कार्त्तिकस्य तु मासस्य प्रसादादहमव्ययः ।।
तव पुत्रत्वमेष्यामि यस्त्वन्यस्तत्पठिष्यति।
अभिलाष्टकमिदं न देयं यस्य कस्य चित् ।।
गोपनीयं प्रयत्नेन एवं वंध्या प्रसूतिकृत ।
स्त्रिया व पुरूषेणापि त्रियमाल्लिङ्ग सन्निधौ ।।
अब्दं जप्तमिदं स्तोत्रं पुत्रदं नात्र संशयः ।
इत्युक्तांतर्दधे वालः सोऽपि विप्रो गृह गतः ।।
इति स्कन्द पुराणे काशीखण्डे अभिलाषाष्टक स्तोत्रं समाप्तम् ।।

* * *

शरभेशाष्टक स्तोत्र

श्री शिव उवाच -

श्रुणु देवि महागुह्यं परं पुण्य विवर्द्धनम्।
शरभेशाष्टकं मन्त्रं वक्ष्यामि तव तत्वतः ।।
ऋषि न्यासादिकं यत्तत्सर्व पूर्ववदाचरेत्।
ध्यान भेदं विशेषेण वक्ष्यामहमतः शिवे।।
ज्वलन कुटिलकेशं सूर्य चन्द्राग्नि नेत्रम्।
निशिततर नखाग्रोद्धूत हेमापि देहम्।।
शरभमथ मुनीद्रैः सेव्यमानं सिताङ्गम् ।
प्रणत भय विनाशं भावयेत्पक्षिराजम् ।।

स्तोत्र -

देवाधिदेवाय जगन्मयाय शिवाय नालीक निभाननाय ।
शर्वाय भीमाय शराधिपाय नमोस्तुतुभ्यं शरभेश्वराय ।।1।।
हराय भीमाय हरप्रियाय भवाय शान्ताय परात्परराय ।
मृडाय रूद्राय विलोचनाय नमो तुभ्यं शरभेश्वराय ।।2।।
शीतांशुचूडाय दिगम्बराय सृष्टि स्थिति ध्वंसनकारणाय ।
जटाकलापाय जितेन्द्रियाय नमोस्तु तुभ्यं शरभेश्वराय ।।3।।
कलंककण्ठाय भवान्तकाय कपाल शूलात्त कराम्बुजाय ।
भुजंगभूषाय पुरान्तकाय नमोस्तु तुभ्यं शरभेश्वराय ।।4।।
शमादिषट्काय यमान्तकाय यमादि योगाष्टक सिद्धिदाय ।
उमाधिनाथाय पुरातनाय नमोस्तु तुभ्यं शरभेश्वराय ।।5।।
घृणादि पाशाष्टक वर्जिताय खिलीकृतास्मत्पथि पूर्वगाय ।
गुणादिहीनाय गुणत्रयाय नमोस्तु तुभ्यं शरभेश्वराय ।।6।।
पञ्चाननायनिल भास्कराय पञ्चाशदर्णाद्य पराक्षयाय ।
पञ्चाक्षरेशाय जगद्धिताय नमोस्तु तुभ्यं शरभेश्वराय ।।7।।
नीलकण्ठाय रूद्राय शिवाय शशिमौलिने ।
भवाय भव नाशाय पक्षिराजाय ते नमः ।।8।।
परात्पराय घोराय शम्भवे परमात्मने ।
शर्वाय निर्मलाङ्गाय शालुवाय नमो नमः ।।9।।

गंगाधराय साम्वाय परमानन्द तेजसे।
सर्वेश्वराय शान्ताय शरभाय नमो नमः ।।10।।
वरदाय वराङ्गाय वामदेवाय शूलिने।
गिरिशाय गिरीशाय गिरिजापतये नमः ।।11।।
कनक जठकरकोद्यद्रक्त पानोन्मदेन
प्रथित निखिल पीडा नारसिंहेन जाता
शरभहर शिवेश त्राहि नः सर्वपापा-
दनिशमिह कृपाब्धे शालुवेश प्रभोत्वम् ।।12।।
सर्वेश सर्वाधिक शान्त मूर्ते कृता पराधानमरानथान्यान् ।
विनीय विश्व विधायि नीते नमोस्तु तुभ्यं शरभेश्वराय ।।13।।
द्रंष्ट्रानखोग्रः शरभः सपक्षश्चतुर्भुचश्चाष्ट जदः सहेतिः।
कोटीरगन्गेन्दु धरो नृसिंह क्षोभापहोस्मद्रिपुहास्तु शंभुः ।।14।।
हुंकारी शरभेश्वरोष्ट चरणः पक्षीचतुर्वाहुकः
पादाकृष्ट नृसिंह विग्रहधरः कालाग्नि कोटिद्युति ।।15।।
विश्वक्षोभः हरः सहेतिर्निशं ब्रह्मेन्द्र मुख्यै स्तुतो
गंगाचन्द्रधरः पुरत्रयहरः सद्यो रिपुघ्नोऽस्तु नः ।।16।।
मृगांक लांगूल सचंचु पक्षो दंष्ट्राननांघ्रिश्च भुजासहस्रः
त्रिनेत्र गंगेन्दुधरः प्रभाढ्यः पायादपायाच्छरभेश्वरोनः ।।17।।
नृसिंहमव्युग्रमतीव तेजः प्रकाशितं दानव भंग दक्षम्
प्रशान्तिमन्तं विदधाति यो मां सोऽस्मानपायाच्छरभेश्वरो नः ।।18।।
योऽभूत सहस्रांशु शत प्रकाशः स पक्षिसिंहाकृतिरष्टपादः।
नृसिंह संक्षोभशमात्त रूपः पायादपायाच्छरभेश्वरो नः ।।19।।
त्वां मन्युमन्तं प्रवदन्ति वेदास्त्वां शान्तिमन्तं मुनयो गृणन्ति।
दृष्टे नृसिंह जगदीश्वरे ते सर्वापराधं शरभ क्षमस्व ।।20।।
करचरण कृतं वाक् कर्मजं कायजं वा
श्रवण नयनजं वा मानसं वापराधं
विहितमविहितं वा सर्वमेतत्क्षमस्व
शिव शिव करूणाब्धे श्री महादेव शंभोः ।।21।।
रूद्रः शंकर ईश्वरः पशुपतिः स्थानुः कपर्दी शिवो ।
वागीशो वृषभध्वजः स्मरहरो भक्तप्रियस्त्र्यम्वकः
भूतेशोजगदीश्वरश्च वृषभो मृत्युंजय श्रीपतिः
योऽस्मान् कालगतोऽवतात्पुरहरः शंभुः पिनाकी हरः ।।22।।

यतो नृसिंह हरसि हर इत्युच्यते बुधैः ।
यतो विभर्ति सकलं विभज्य तनुमष्टधा ।।23।।
अतोऽस्मानपाहि भगवन्प्रसीद च पुनः पुनः ।
इति स्तुतो महादेवः प्रसन्नो भक्त वत्सलः ।।24।।
सुरानाह्लादयामास वरदार्नरभीप्सितैः ।
प्रसन्नोस्मि स्तवेनाहमनेन विवुधेश्वराः ।।25।।
मयि रूद्रे महादेवे भयत्वं भक्तिमूर्जितम्
ममांशोऽयं नृसिंहोऽयं मयि भक्त ममस्त्विह ।।26।।
इमं स्तवं जपेद्यस्तु शरभेशाष्टकं नरः ।
तस्य नश्यन्ति पापानि रिपवश्च सुरोत्तमा ।।27।।
नश्यन्ति सर्व रोगाणि क्षयरोगादिकानि च।
अशेष गृह भूतानि कृत्तिमाणि ज्वराणि च ।।28।।
सर्प चोराग्नि शार्दूल गजपौत्रिमुखानि च ।
अन्यानि च वनस्थानि नास्ति भीतिर्न संशयः ।।29।।
इत्युक्त्वान्तर्दधे देवि देवान् शरभ शालुवः
ततस्ते स्व-स्वधामानि ययुराह्लाद पूर्वकम् ।।30।।
एतच्छरभकं स्तोत्रं मन्त्रभूतं जपेन्नरः ।
सर्वान्कामानवाप्नोति शिवलोकं च गच्छति ।।31।।

इति आकाश भैरव कल्पोक्त प्रत्यक्ष सिद्धिप्रद
शरभेशाष्टक स्तोत्रं सम्पूर्णम् ।।

* * *

मृत्यु निवारक मृत्युञ्जय स्तोत्र

चन्द्रशेखर चन्द्रशेखर चन्द्रशेखर पाहि माम् ।
चन्द्रशेखर चन्द्रशेखर चन्द्रशेखर रक्ष माम् ।
चन्द्रशेखर चन्द्रशेखर चन्द्रशेखर मामव
चन्द्रशेखर चन्द्रशेखर चन्द्रशेखर मां स्मर ।।1।।

रत्न सानुशरासनं रजताद्रिश्रृङ्ग निकेतनम्
शिञ्जिनीकृत पन्नगेश्वर मच्युतानन सायकम् ।
क्षिप्रदग्ध पुरत्रयं त्रिदिवालयैरभि वन्दितम्
चन्द्रशेखर माश्रये मम कि करष्यितिं वै यम: ।।2।।

मत्तवारण-मुख्य-चर्म-कृतोत्तरीय-मनोहरम्
पङ्कजासन-पद्मलोचन-पूजिताङ्घ्रि सरोरूहम् ।
देवसिन्धुतरङ्गसीकर-सिक्त-शुभ्र जटाधरम्
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यम: ।।3।।

कुण्डलीकृत कुण्डलेश्वर-कुण्डलं वृषवाहनम्
नारादादि मुनीश्वरस्तुत वैभवं भुवनेश्वरम्।
अन्धकांधकमाश्रितामरपादपं शमनान्तकम्
चन्द्रशेखरमाश्रये मम कि करष्यिति वै यम: ।।4।।

भेषजं भवरोगिणामखिलापदामपहारिणम्
दक्ष-यज्ञध्वंसनं त्रिगुणात्मकं त्रिविलोचनम् ।
भुक्ति-मुक्ति फलप्रदं सकलाघसंघ निवर्हणम्।
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यम: ।।5।।

यज्ञराजसखं भगाक्षहरं भुजङ्गविभूषणम्
शैलराजसुता परिष्कृत चारूवाम कलेवरम् ।
क्ष्वेडनील गलं परश्वधधारिणं मृगधारिणम्
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यम: ।।6।।

विश्वसृष्टिविधायिनं पुनरेव पालन तत्परम्
संहरन्तमपि प्रपञ्चम शेषलोक निवासिनम् ।
क्रीडयन्तमहर्निषं गणनाथ-यूथ समन्वितम्
चन्द्रशेखरमाश्रये मम कि करिष्यति वै यम: ।।7।।

भक्तवत्सलमर्चितं निधिमक्षयं हरिदंवरम्
सर्वभूतपतिं परात्परमप्रमेयेमनुत्तमम् ।
सोम वारिद भू हुतासन सोमपा निलखाकृतिम्
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ।।8।।

पञ्चपादप पुष्पगन्ध पदाम्बुजद्वय शोभितम्
भाललोचनजात पावक दग्धमन्मथ विग्रहम्।
भस्मदिग्ध कलेवरं भवनाशनं भवमव्ययम्
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ।।9।।

मृत्युभीतमृकण्ड सूनु कृतस्तवं शिवसन्निधौ
यत्र कुत्र च यः पठेन्नहि तस्य मृत्युभयं भवेत् ।
पूर्णमायुररोगितामखिलार्थ सम्पदमादरम्
चन्द्रशेखर एव तस्य ददाति सिद्धिमलौकिकीम् ।।

इति मार्कण्डेय विरचित मृत्युनिवारण स्तोत्रं समाप्तम् ।।

* * *

स्वर्णाकर्षण भैरव स्तोत्रम्

ॐ अस्य श्री स्वर्णाकर्षण भैरव स्तोत्र मंत्रस्य ब्रह्म ऋषिः अनुष्टुप छन्दः श्री स्वर्णाकर्षण भैरवो देवता ह्रीं वीजं क्लीं शक्तिः सः कीलकं मम दारिद्र्य नाशार्थे पाठे विनियोगः

ऋष्यादिन्यासः

ब्रह्मर्षये नमः शिरसि ।
अनुष्टुप छन्दसे नमः मुखे ।
स्वर्णाकर्षण भैरवाय नमः हृदि ।
ह्रीं वीजाय नमः गुह्ये ।
क्लीं शक्तये नमः पादयो।
सः कीलकाय नमः नाभौ
विनियोगाय नमः सर्वाङ्गे ।
ह्रां ह्रीं ह्रूं इति कर षडङ्गन्यासः

ध्यानम्-

पारिजात द्रुम कान्तारे स्थिते माणिक्य मण्डपे
सिंहासन गतं वन्दे भैरवं स्वर्ण दायकम्
गाङ्गेय पात्रं डमरूं त्रिशूलं वरं करः संदधतं त्रिनेत्रम्
देव्यायुतं तप्तस्वर्णवर्ण स्वर्णाकर्षणभैरवमाश्रयामि ।।

मन्त्रः-

ॐ ऐं ह्रीं श्रीं ऐं श्रीं आपदुद्धारणाय ह्रां ह्रीं ह्रूं अजामल वद्धाय लोकेश्वराय स्वर्णाकर्षण-भैरवाय मम दारिद्र्य विद्वेषणाय महाभैरवाय नमः श्रीं ह्रीं ऐं ।

स्तोत्र -

ॐ नमस्ते भैरवाय ब्रह्मविष्णुशिवात्मने ।
नमस्त्रैलोक्य वन्ध्याय वरदाय वरात्मने ।।
रत्नसिंहासनस्थाय दिव्याभरण शोभिने ।
दिव्यमाल्यविभूषाय नमस्ते दिव्यमूर्तये ।।
नमस्तेऽनेक हस्ताय अनेक शिरसे नमः ।

नमस्तेऽनेक नेत्राय अनेक विभवे नमः ।।

नमस्तेऽनेक कण्ठाय अनेकांसाय ते नमः ।

नमस्तेऽनेक पाश्र्वाय नमस्ते दिव्य तेजसे ।।

अनेकायुध युक्ताय अनेक सुर सेविने ।

अनेक गुण युक्ताय महादेवाय ते नमः ।।

नमो दारिद्र्य कालाय महा सम्पद् प्रदायिने ।

श्री भैरवी संयुक्ताय त्रिलोकेशाय ते नमः ।।

दिगम्बर नमस्तुभ्यं दिव्याङ्गाय नमो नमः ।

नमोऽस्तु दैत्य कालाय पाप कालाय ते नमः ।।

सर्वज्ञाय नमस्तुभ्यं नमस्ते दिव्य चक्षुषे ।

अजिताय नमस्तुभ्यं जितमित्राय ते नमः ।।

नमस्ते रूद्र रूपाय महावीराय ते नमः ।

नमोऽस्त्वनन्त वीर्याय महाघोराय ते नमः ।।

नमस्ते घोर घोराय विश्वघोराय ते नमः ।

नमः उग्राय शान्ताय भक्तानां शान्तिदायिने ।।

गुरवे सर्वलोकानां नमः प्रणव रूपिणे ।

नमस्ते वाग्भवाख्याय दीर्घकामाय ते नमः ।।

नमस्ते कामराजाय योषित कामाय ते नमः ।

दीर्घमाया स्वरूपाय महामायाय ते नमः ।।

सृष्टिमाया स्वरूपाय निसर्ग समयाय ते ।

सुरलोक सुपूज्याय आपदुद्धारणाय च ।।

नमो नमो भैरवाय महादारिद्र्य नाशिने ।

उन्मूलने कर्मठाय अलक्ष्म्याः सर्वदा नमः ।।

नमो अजामलवद्धाय नमो लोकेश्वराय ते ।

स्वर्णाकर्षण शीलाय भैरवाय नमो नमः

मम दारिद्र्य विद्वेषणाय लक्ष्याय ते नमः ।

नमो लोकत्रयेशाय स्वानन्द निहिताय ते ।।

नमः श्रीबीज रूपाय सर्वकाम प्रदायिने ।

नमो महाभैरवाय श्री भैरव नमो नमः ।।

धनाध्यक्ष नमस्तुभ्यं शरण्याय नमो नमः ।

नमः प्रसन्न आदि देवाय ते नमः ।।

नमस्ते मन्त्र रूपाय नमस्ते मन्त्र रूपिणे ।
नमस्ते स्वर्णरूपाय सुवर्णाय नमो नमः ।।

नमः सुवर्ण वर्णाय महापुण्याय ते नमः ।
नमः शुद्धाय बुद्धाय नमः संसार तारिणे ।।

नमो देवाय गुह्याय प्रचलाय नमो नमः ।
नमस्ते बाल रूपाय परेषां बल नाशिने ।।

नमस्ते स्वर्ण संस्थाय नमो भूतलवासिने ।
नमः पातालवासाय अनाधाराय ते नमः ।।

नमो नमस्ते शान्ताय अनन्ताय नमो नमः ।
द्विभुजाय नमस्तुभ्यं भुजत्रय सुशोभिने ।।

नमोऽनमादि सिद्धाय स्वर्णहस्ताय ते नमः ।
पूर्णचन्द्र प्रतीकाश बदनाम्भोज शोभिने ।।

नमस्तेऽस्तु स्वरूपाय स्वर्णालङ्कार शोभिने ।
नमः स्वर्णाकर्षणाय स्वर्णाभाय नमो नमः ।।

नमस्ते स्वर्णकण्ठाय स्वर्णाभाम्बर धारिणे ।
स्वर्णसिंहानस्थाय स्वर्णपादाय ते नमः ।।

नमः स्वर्णभपादाय स्वर्णकाञ्ची सुशोभिने ।
नमस्ते स्वर्णजङ्घाय भक्तकामदुधात्मने ।।

नमस्ते स्वर्णभक्ताय कल्पवृक्ष स्वरूपिणे ।
चिन्तामणि स्वरूपाय नमो ब्रह्मादि सेविने ।।

कल्पद्रुमाघः संस्थाय बहुस्वर्ण प्रदायिने ।
नमो हेमाकर्षणाय भैरवाय नमो नमः ।।

स्तवेनानेन संतुष्टो भव लोकेश भैरव ।
पश्य मां करूणादृष्ट्या शरणागत वत्सल ।।

श्री महाभैरवस्येदं स्तोत्रमुक्तं सुदुर्लभम् ।
मन्त्रात्मकं महापुण्यं सर्वेश्वर्य प्रदायकम् ।।

यः पठेन्नित्यमेकाग्रं पातकै स प्रमुच्यते ।
लभते महतीं लक्ष्मीं अष्टैश्वर्यमवाप्नुयात् ।।

चिन्तामणिमवाप्नोति धेनु कल्पतरूं ध्रुवम् ।
स्वर्ण राशिमवाप्नोति शीघ्रमेव न संशयः ।।

त्रिसन्ध्यं यः पठेत्स्तोत्रं दशावृत्या नरोत्तमः ।
स्वप्ने श्री भैरवस्तस्य साक्षाद्भूत्वा जगद्गुरूः ।।
स्वर्णराशि ददात्यस्यै तत्क्षणं नात्र संशयः ।
अष्टावृत्या पठेत् यस्तु सन्ध्यायां वा नरोत्तमम् ।।
लभते सकलान् कामान् सप्ताहान्नात्र संशयः ।
सर्वदः य : पठेस्तोत्रं भैरवस्य महात्मनाः ।।
लोकत्रयं वशीकुर्यादचलां लक्ष्मीमवाप्नुयात।
नभयं विद्यते क्वापि विषभूतादि सम्भवम् ।।
म्रियते शत्रवस्तस्य अलक्ष्मी नाशमाप्नुयात् ।
अक्षयं लभते सौख्यं सर्वदा मानवोत्तमः ।।
अष्ट पञ्चाद्वर्णाढ्यो मन्त्रराजः प्रकीर्तितः ।
दारिद्र्य दुःखशमनः स्वर्णाकर्षण कारकः ।।
य एन म्सञ्चयेद्धीमान् स्तोत्रं वा प्रपठेत् सदा।
महा भैरव सायुज्यं स अन्तकालेलभेद ध्रुवम् ।।
इति रूद्रयामल तन्त्रे स्वर्णाकर्षण भैरव स्तोत्रं सम्पूर्णम्।।

* * *

प्रदोष स्तोत्र

जय देव जगन्नाथ जय शंकर शाश्वत
जय सर्व सुराध्यक्ष जय सर्व सुरार्चित ॥1॥
जय सर्व गुणातीत जय सर्व वरप्रद
जय नित्य नराधार जय विश्वंभराव्यय ॥2॥
जय विश्वैक वंद्येश जय नागेन्द्र भूषण
जय गौरीपते शम्भो जय चन्द्रार्ध शेखर ॥3॥
जय कोट्यर्क संकाश जयानन्त गुणाश्रय ।
जय भद्र विरूपाक्ष जयर्चित्य निरञ्जन ॥4॥
जय नाथ कृपासिन्धो जय भक्तार्ति भञ्जन ।
जय दुस्तर संसार सागरो तारण प्रभो ॥5॥
प्रसीद में महादेव संसारार्तस्य सिद्यतः ।
सर्व पापक्षयं कृत्वा रक्ष मां परमेश्वर ॥6॥
महादारिद्रय मग्नस्य महापाप हतस्य च
महाशोकनिविष्टस्य महारोगातुरस्य च ॥7॥
ऋणभार परीतस्य दह्य मानस्य कर्मभिः ।
ग्रहैप्रपीडमानस्य प्रसीद मम शंकर ॥8॥
दारिद्र पार्थये देवं प्रदोषे गिरिजापतिं ।
अथाद्योवाथराजावा पार्थये देवमीश्वरं ॥9॥
दीर्घमायुः सदारोग्यं कोशवृद्धिर्वलोन्नति
ममास्तु नित्यमानन्दः प्रसादात्तव शंकर ॥10॥
शत्रवः संक्षयं यान्तु प्रसीदन्तु मम प्रजा
नश्यन्तु दस्यवो राष्ट्रे जनाः सन्तु निरापदः ॥11॥
दुर्भिक्षमारि सन्तापाः शमीयान्तु महीतल ।
सर्व शश्य समृद्धिश्च भूयात्सुख मयादिशः ॥12॥
एवमाराधये देवं पूजान्ते गिरिजापतिं ।
ब्राह्मणान्भोजयेत्पश्चात् दक्षिणाभिश्च पूजयेत् ॥13॥
सर्व पाप क्षयकरी सर्वरोग निवारिणि
शिवपूजामयाख्याता सर्वाभीष्ट फलप्रद ॥14॥
इति प्रदोष स्तोत्रं सम्पूर्णम्॥

* * *

महाविद्या कवच

श्रुणुदेवि प्रवक्ष्यामि कवचं सर्व सिद्धिदम् ।
आद्याया महाविद्यायाः सर्वाभीष्ट फलप्रदम् ॥1॥
कवचस्य ऋषिर्देवी सदाशिव इतीरितः ।
छन्दोऽनुष्टुब् देवता च महाविद्या प्रकीर्तितः ॥2॥
धर्मार्थ काम मोक्षाणां विनियोगश्च साधने ॥3॥
ऐं कारः पातु शीर्षे मां काम बीजं तथा हृदि ।
रमावीजं सदापातु नाभौ गुह्ये च पादयोः ॥4॥
ललाटे सुन्दरी पातु उग्रा मां कण्ठदेशतः ।
भगमाला सर्व्व गात्रे लिंगे चैतन्यरूपिणी ॥5॥
पूर्वे मां पातु वाराही ब्रह्माणी दक्षिणे तथा ।
उत्तरे वैष्णवी पातु चेन्द्राणी पश्चिमेऽवतु ॥6॥
माहेश्वरी च आग्नेयां नैऋते कमला तथा
वायव्यां पातु कौमारी चामुण्डा हीशकेऽवतु ॥7॥
इदं कवचमज्ञात्वा महाविद्याञ्च यो जपेत् ।
न फलं जायते तस्य कल्पकोटि शतैरपि ॥ 8॥
इतिश्री रूद्रयामले महाविद्याकवचम् ॥

* * *

महाविद्या स्तोत्र

शिव उवाच -

दुर्लभ तारिणी मार्ग दुर्लभं तारिणी पदम् ।
मन्त्रार्थ मन्त्र चैतन्यं दुर्लभं शव साधनम ।।1।।
श्मशान साधनं योनि साधनं ब्रह्म साधनम् ।
क्रिया साधनक भक्ति साधनं मुक्ति साधनम् ।।2।।
स्तवप्रसादाद्देवेशि सर्वाः सिध्यन्ति सिद्धयः ।
नमस्ते चण्डिके चण्डि चण्डमुण्ड विनाशिनि ।।3।।
नमस्ते कालिके काल महाभय विनाशिनि।।4।।
शिवेरक्ष जगद्धात्रि प्रसीद हर वल्लभे ।
प्रणमामि जगद्धात्रीं जगत्पालन कारिणीम् ।। 5।।
जगत् क्षोभकरी विद्यां जगत् सृष्टि विधायिनीम् ।
करालां विकटां घोरां मुण्डमालाविभूषिताम् ।।6।।
हरार्चिता हराराध्यां नमामि हरवल्लभाम् ।
गौरीं गुरूप्रियां गौर वर्णालङ्कार भूषिताम् ।।7।।
हरिप्रियां महामायां नमामि ब्रह्मपूजिताम् ।
सिद्धां सिद्धेश्वरीं सिद्ध विद्याधर गणैर्युताम् ।।8।।
मन्त्रसिद्धिप्रदां योनि सिद्धिदां लिंग शोभिताम् ।
प्रणमामि महामायां दुर्गा दुर्गति नाशिनीम् ।।9।।
उग्रामुग्रमयीमुग्र तारामुग्र गणैर्युताम्।
नीलां नीलघनश्यामां नमामि नीलसुन्दरीम् ।।10।।
श्यामाङ्गीं श्यामघटितां श्यामवर्ण विभूषिताम् ।
प्रणमामि जगद्धात्रीं गौरीं सर्वार्थ साधिनीम् ।।11।।
विश्वेश्वरीं महाघोरां विकटां घोरनादिनीम् ।
आद्यामाद्यगुरोराद्यामाद्यानाथ प्रपूजिताम् ।।12।।
श्री दुर्गा धनदामन्नपूर्णा पद्मां सुरेश्वरीम् ।
प्रणमामि जगद्धात्रीं चन्द्रशेखर वल्लभाम् ।।13।।
त्रिपुरा सन्दुरीं वालामवलागण भूषिताम् ।
शिवदूतीं शिवाराध्यां सनातनीम् ।।14।।

सुन्दरीं तारिणीं सर्व शिवागण विभूषिताम् ।
नारायणीं विश्वपूज्यां ब्रह्म विष्णु हरप्रियाम् ।।15।।
सर्वसिद्धिप्रदां नित्यामनित्य गुण वर्जिताम् ।
सगुणां निर्गुणां ध्येयामर्चितां सर्व सिद्धिदाम् ।।16।।
दिव्यां सिद्धिप्रदां विद्यां महाविद्यां महेश्वरीम् ।
महेश भक्तां माहेशीं महाकाल प्रपूजिताम् ।।17।।
प्रणमामि जगद्धात्रीं शुम्भासुर विमर्दिनीम् ।
रक्तप्रियां रक्तवर्णां रक्तबीज विमर्दिनीम् ।।18।।
भैरवीं भुवनां देवीं लोलजिह्वा सुरेश्वरीम् ।
चतुर्भुजां दशभुजामष्टदशभुजां शुभाम् ।।19।।
त्रिपुरेशीं विश्वनाथप्रियां विश्वेश्वरीं शिवाम् ।
अट्टहासामट्टहास प्रियां धूम्रविनासिनीम ।।20।।
कमलां छिन्नभालाञ्च भागङ्गीं सुरसुन्दरीम् ।
षोडशीं विजयां भीमां धूमाञ्च बगलामुखीम् ।।21।।
सर्व सिद्धिप्रदां सर्व विद्यामन्त्र विशोधिनीम् ।
प्रणमामि जगत्तारां साराञ्च मंत्र सिद्धये ।।22।।
इत्येवञ्च वरारोहे स्तोत्रं सिद्धकरं परम् ।
पठित्वा मोक्षमाप्नोति सत्यं वै गिरिनन्दिनि ।।23।।
कुजवारे चतुर्दश्याममायां जीववासरे ।
शुक्रे निशिगते स्तोत्रं पठित्वा मोक्षमाप्नुयात् ।।24।।
त्रिपक्षे मन्त्रसिद्धिस्यात्स्तोत्रपाठाद्धि शंकरि ।
चतुर्दश्यां निशाभागे शनि भौम दिने तथा ।।25।।
निशामुखे पठेत्स्तोत्रं मन्त्र सिद्धिमवाप्नुयात्
केवलं स्तोत्रपाठाद्धि मन्त्र सिद्धिरनुत्तमा ।
जागर्ति सततं चण्डी स्तोत्र पाठाद्भुजङ्गिनी ।।26।।
इति मुण्डमालातन्त्रोक्त महाविद्यास्तोत्रं सम्पूर्णम् ।।

* * *

श्मशान काली कवच

कैलाश शिखरारूढं शंकरं वरद शिवं ।
प्रणम्य पार्वतीदेवि परिप्रच्छतिसादरम् ।।

श्री पार्वत्युवाच -

भगवन्देव देवेश देवानां भोगद प्रभो ।
ब्रवूहि में महादेव गोप्यं यद्यपि च प्रभो ।।
शत्रूणां येन नाश्यादात्मनो रक्षणं भवेत् ।
परमैश्वर्यमतुलं लभते येन तद्वदा ।।

श्री भैरव उवाच -

वक्ष्यामि ते महादेवि सर्वधर्म विदांवरे ।
अद्भुतं कवचं देव्या सर्वकाम प्रसाधनम् ।।
विशेषतः शत्रुनाशकरं रक्षाकरं नृणाम् ।
सर्वारिष्ट प्रशमनमभिचार विनाशकम् ।।
सुखदं भोगदं चैव वशीकरणमुत्तमम् ।
शत्रु सङ्घः क्षयं यान्ति भवन्ति व्याधि पीडिताः ।।
दुःखिनो ज्वरिणञ्चैव स्वामीष्ट प्रत्युतास्तथा ।
अस्य श्री कालिका कवचस्य भैरव ऋषिः गायत्री छन्दः
श्री श्मशान कालिका देवता शत्रु संघ नाशे विनियोगः ।।

ध्यानम् -

ध्यायेत्कालीं महामायां त्रिनेत्रां बहुरूपिणीम् ।
चतुर्भुजां लोलजिह्वां पूर्णचन्द्र निभाननाम् ।।
नीलोत्पल दलप्रख्यां शत्रुसंघ विदारिणीम् ।
नरमुण्डं तथा खड्गं अभयं वरदं तथा ।।
विभ्राणां रक्तनयनां दंष्ट्रा निर्घोर रूपिणीम् ।
अट्टाट्टहास निरतां सर्वदा च दिगम्बराम्।
शवासनस्थितां देवीं मुण्डमाला विभूषिताम् ।।

स्तोत्रम् -

कालिका घोररूपाद्या सर्वकामप्रदा शुभा ।

सर्वदेवस्तुता देवि शत्रुनाशं करोतु मे ।।
ह्रीं ह्रीं स्वरूपिणी चैव ह्रां ह्रीं ह्रूं स्वरूपिणी ।
तथा ह्रीं ह्रां क्षौं क्षौं स्वरूपासा सदा शत्रु प्रशास्तु मे ।।
श्री ह्रीं ऐं रूपिणी देवि भवबन्ध विमोचिनी ।
ह स क ल ह्रीं स्वरूपासौ रिपून्सा हन्तु सर्वदा ।।
यथा शुम्भोहतोदैत्यौ निशुम्भस्य महासुरा: ।
वैरिनाशय वन्दे तां कालिकां शंकरप्रियां ।।
ब्राह्मी शैवी वैष्णवी च वाराही नारसिंहिका ।
कौमार्यैन्दी च चामुण्डा खातु चैव ममद्विष: ।।
सुरेश्वरी घोररूपा चण्डमुण्ड विनाशिनी ।
मुण्डमाला घृताङ्गीं च सर्वत: पातु मां सदा ।।

ह्रीं ह्रीं कालिके घोरदंष्ट्रे रूधिरप्रिये रूधिरपूर्णवक्त्रें रूधिरा- वृतस्तनि ममामुक शत्रून् खादय खादय हिंसय हिंसय मारय मारय भिन्दि भिन्दि छिन्धि छिन्धि उच्चाटय उच्चाटय द्रावय द्रावय शोषय शोषय स्वाहा । वां वीं कालिकायैं मदीय शत्रुं समर्पयामि स्वाहा । ॐ जय जय किरि किरि किटि किटि कट्ट कट्ट मर्दय मर्दय मोहय मोहय हर हर ममामुक शत्रून् ध्वंसय ध्वंसय भक्ष भक्ष त्रोटय त्रोटय मोहय मोहय यातुधानानि चामुण्डे सर्वजनान् राज्ञोराजपुरूषान् स्त्रियो मम वश्य: कुरू कुरू तनु तनु धान्यं धनंऽश्वान् गजान् रत्नानि दिव्यकामिनी: पुत्रान् पौत्रान् राजश्रियं देहि देहि यच्छ यच्छ रक्ष रक्ष ॐ क्षां क्षीं क्षूं क्षैं क्षौं क्ष: स्वाहा।

इत्येतत्कवचं दिव्यं कथितं शम्भुना पुरा ।
ये पठन्ति सदा भक्त्या ध्रुवं नश्यन्ति शत्रव: ।।
वैरिणा प्रलयं यान्ति व्याधितश्च भवन्ति हि ।
धनहीना: पुत्रहीना: शत्रव: तस्य सर्वदा ।।
सहस्त्र पठनात्सिद्धि: कवचस्य भवेत्तदा ।
तत: कार्याणि सिध्यन्ति यथा शंकर भाषितम् ।।
श्मशानाङ्गारमादाय चूर्ण कृत्वा प्रयत्नत: ।
पादोदकेन पिष्ट्वा च लिखेल्लोह शलाकया ।।
भूमौ शत्रून हीनरूपानुत्तरां शिरसांस्तथा ।

हस्तं दत्त्वातत्धाये कवचन्तु स्वयं पठेत् ।।
शत्रौः प्राणप्रतिष्ठान्तु कुर्यामंत्रेण मन्त्रवित् ।
हन्यादस्त्र प्रहारेण शत्रूर्गच्छेत यमक्षयम् ।।
ज्वलिताङ्गार तापेन ज्वरी भवति तादृशः ।
प्रोक्षणैर्वामपादेन दरिद्रो भवति ध्रुवम् ।।
वैरिनाशकरं प्रोक्तं कवचं वश्य कारकम् ।
परमैश्वर्यदं चैव पुत्रपौत्रादि वृद्धिदम् ।।
प्रभात समये चैव पूजाकाले विशेषतः ।
सायंकाले तथा पाठात् सर्वसिद्धि भवेद् ध्रुवम् ।
शत्रुरूच्चनाटनं याति देशाच्च विच्युतो भवेत् ।
पश्चात् किंकरतामेति सत्यं सत्यं न संशयः ।।
शत्रुनाश करे देवि सर्व सपंत्करे शुभे ।
सर्वदेवस्तुते देवि कालिके त्वां नताम्यऽहं ।।

इति भैरवकृत श्मशान कालिका कवच सम्पूर्णम् ।।

* * *

प्रत्यंगिरा, स्तोत्र

अस्य श्री प्रत्यङ्गिरा स्तोत्रस्य अंगिरा ऋषिः अनुष्टुप छन्दः श्री प्रत्यङ्गिरा देवता ॐ बीजं शक्तिः ममाभीष्ट सिध्यर्थे पाठे विनियोगः ।

ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः षडङ्गन्यासं कुर्यात् ।

ध्यानम् –

कृष्णरूपां बृहद्रूपां रक्तकुंचिता मूर्द्धजाम ।
शिरः कपाल मालांच विकेशीं घूर्णिताननाम् ।।
रक्तनेत्रामति क्रुद्धां लम्बजिह्वामधोमुखीम् ।
दंष्ट्रा कराल वदनां नेत्र भ्रकुटिलेक्षणाम् ।।
ऊर्ध्वदक्षिण हस्तेन विभ्रतीं च परष्यधम् ।।
अधोदक्षिण हस्तेन विभ्राणां शूलमद भुतम।
ततोर्ध्ववाम हस्तेन धारयन्तीं महांकुशां ।
अधोवाम करेणाथ विभ्राणां पाश मेव च ।
एवं ध्यात्वा महाकृत्यां स्तोत्रमेतदुदीरयेत् ।।

ईश्वर उवाच –

नमः प्रत्यङ्गिरे देवि प्रतिकूल विधायिनि ।
नमः सर्वगते शान्ते परचक्र विमर्दिनी ।।
नमो जगत्र्याधारे परमन्त्र विदारिणी ।
नमस्ते चण्डिके चण्डी महामहिष वाहिनी।।
नमो ब्रह्माणि देवेशि रक्तबीज निपातिनी ।
नमः कौमारिके कुण्ठी परदर्प निषूदिंनी ।।
नमो वाराहि चैन्द्राणि परे निर्वाण दायिनी ।
नमस्ते देवि चामुण्डे चण्ड मुण्ड विदारिणी ।।
नमो मातर्महालक्ष्मी संसारार्णव तारिणी ।
निशुम्भ दैत्य संहारि कालान्तकि नमोस्तुते ।।

ॐ कृष्णाम्बर शोभिते सकल सेवक जनोपद्रवकारक दुष्टग्रह

राजघन्टा संहट्ट हारिहिं कालान्तकि नमोस्तुते ।। दुर्गे सहस्त्र-वदने अष्टादशभुजलता भूषिते महाबल पराक्रमे अद्भुते अपराजिते देवि प्रत्यङ्गिरे सर्वार्तिशायिनि परकर्म विध्वंसिनि परयंत्र मंत्र तंत्र चूर्णादि प्रयोगकृत वशीकरण स्तम्भन जृम्भणादि दोषान् चयाच्छादिनि सर्वशत्रूच्चाटिनि मारिणि मोहिनि वशीकरणि स्तम्भिनि जृम्भिणि आकर्षिणि सर्वदेवग्रह योगग्रह योगिनिग्रह दानवग्रह दैत्यग्रह राक्षसग्रह सिद्धग्रह यक्षग्रह गुह्यकग्रह विद्याधरग्रह किन्नरग्रह गन्धर्वग्रह अप्सराग्रह भूतग्रह प्रेतग्रह पिशाचग्रह कुष्माण्डग्रह गजादिकग्रह मातृग्रह पितृग्रह वेतालग्रह राजग्रह चौरग्रह - गोत्र ग्रहाश्वदेवता ग्रह गोत्र देवता ग्रह आधिग्रह व्याधिग्रह अपस्मार ग्रह नासाग्रह गलग्रह याम्यग्रह डामरिकाग्रहोदक ग्रह विद्योरग्रहाराति ग्रह छायाग्रह शल्यग्रह सर्वग्रह विशल्यग्रह कालग्रह सर्वदोषग्रह विद्राविणी सर्वदुष्ट भक्षिणि सर्वपाप निशूदिनि सर्वयन्त्र स्फोटिनि सर्वश्रृंखला त्रोटिनि सर्वमुद्रा द्राविणि ज्वालाजिह्वे कराल वक्त्रे रौद्रमूर्ते देवि प्रत्यङ्गिरे सर्वदेहि यशोदेहि पुत्रं देहि आरोग्यं देहि भुक्ति मुक्तयादिकं देहि सर्वसिद्धि देहि मम सपरिवारं रक्ष रक्ष पूजा जप होम ध्यानार्चनादिकं कृतं न्यूनमधिकं वा परिपूर्ण कुरू कुरू अभिमुखि भव भव रक्ष रक्ष स्वापराधं एवं स्तुता महालक्ष्मी शिवेन परमात्मनः उवाचेदं प्रहृष्टाङ्गी श्रृणुष्व परमेश्वरः ।।

फलश्रुति -

येतत् प्रत्यङ्गिरा स्तोत्रं ये पठन्ति द्विजोत्तमाः ।
श्रृण्वन्तः साधयन्ताश्च तेषां सिद्धिप्रदा भवेत् ।।
श्रीश्च कुब्जीं महाकुब्जी कालिका गुह्य कालिका ।
त्रिपुरा त्वरिता नित्या त्रैलोक्य विजया जया ।।
जितापराजिता देवी जयन्ती भद्रकालिका ।
सिद्धलक्ष्मी महालक्ष्मीः कालरात्रि नमोस्तुते ।।
काली कराल विक्रान्ते कालिका पाप हारिणी ।
विकरालमुखी देवि ज्वालामुखि नमोस्तुते ।।

इदं प्रत्यङ्गिरा स्तोत्रं यः पठेन्नियतः शुचिः ।
तस्य सर्वार्थ सिद्धि स्यान्नात्र कार्या विचरणाः ।।

शत्रवो नाशमायान्ति महानैश्वर्यवान्भवेत् ।
इदं रहस्यं परमं नाख्येयं यस्य कस्यचित् ।।

सर्वपापहरं पुण्यं सद्यः प्रत्यय कारकम् ।
गोपनीयं प्रयत्नेन सर्वकाम फलप्रदम् ।।

इति अथर्वण रहस्ये प्रत्यङ्गिरा स्तोत्रं समाप्तम् ।।

* * *

श्री काली हृदय

श्री महाकाल उवाच -

महाकौतूहल स्तोत्र हृदयाख्यं महोत्तमम् ।
श्रृणु प्रिये महागोप्यं दक्षिणाया सुगोपितम् ।।
अवाच्यमपि वक्ष्यामि तव प्रीत्या प्रकाशितम् ।
अनेभ्यः कुरू गोप्यं च सत्यं सत्यं च शैलजे ।।

श्री देव्युवाच -

कस्मिन्युगे समुत्पन्नं केन स्तोत्रं कृतं पुरा ।
तत्सर्व कथ्यतां शम्भो महेश्वर दयानिधे ।।

श्री महाकाल उवाच -

पुरः प्रजापते शीषश्छेदनं कृतवाहनम् ।
ब्रह्महत्याकृतैः पापैर्भैरवत्वं ममागतम् ।।
ब्रह्महत्त्या विनाशाय कृतं स्तोत्रं मयाप्रिये ।
कृत्या विनाशकं स्तोत्रं ब्रह्महत्यापहारकम् ।।

अस्य श्री दक्षिणाकाल्या हृदयस्तोत्र मन्त्रस्य महाकाल ऋषिः उष्णिकछन्दः श्री दक्षिणा कालिका देवता क्रीं बीजं ह्रीं शक्तिः नमः कीलकं अभीष्ट प्राप्तये जपे विनियोगः ।

क्रां, क्रीं, क्रूं, क्रैं, क्रौं, क्रः, वीजेन हृदिन्यासः

ध्यानम्-

ध्यायेत्कालीं महामायां त्रिनेत्रां बहुरूपिणीम् ।
चतुर्भुजां ललज्जिह्वां पूर्णचन्द्र निभाननाम् ।।
नीलोत्पल दलप्रख्यां शत्रुसङ्घ विदारिणीम् ।
नरमुण्डं तथा खड्गं कमलं वरदं तथा ।।
विभ्राणां रक्तनयनां दंष्ट्राली घोररूपिणीम् ।
अट्टाट्टहास निरतां सर्वदा च दिगम्बराम् ।।
शवासनस्थितां देवीं मुण्डमाला विभूषिताम् ।।
(नागयज्ञोपवीतां च चन्द्रार्द्धकृत शेखराम् ।
जटाजूटां च सञ्चित्य महाकाल समीपगाम्।।)

यन्त्रं श्रृणु परं देव्या सर्वार्थ सिद्धि दायकम् ।
गोप्याद् गोप्यतरं गोप्याद् गोप्यं गोप्यतरं महत् ।।
त्रिकोण पञ्चकं चाष्टकमलं भूपुरान्वितम् ।
मुण्डपङ्क्तं च ज्वालां च कालि यंत्रं सुसिद्धिदम् ।।
काली दक्षिणाकाली च कृष्णरूपा परात्मिका ।
मुण्डमाली विशालाक्षी श्रृष्टि संहार कारिका ।।
स्थितिरूपा महामाया योगनिद्रा भगात्मिका ।
भगसर्पि पानरतः भगोद्योता भगाङ्गजा ।।
आद्या सदानवा घोरा महातेजा करालिका ।
प्रेतवाहा सिद्धिलक्ष्मी अनिरूद्धा सरस्वती ।।
एतानि नाममाल्यानि ये पठन्ति दिने दिने ।
तेषां दासस्य दासोऽहं सत्यं सत्यं महेश्वरी ।।
काली कालहरां देवीं कङ्कालबीज रूपिणीम् ।
काकरूपां कलातीतां कालिकां दक्षिणां भजे ।।
कुण्डगोलप्रियां देवीं स्वायम्भूकुसुमे रताम् ।
रतिप्रयां महारौद्रीं कालिकां प्रणमाम्यहम् ।।
दूतीप्रियां महादूतीं दूतीयोगेश्वरीं पराम् ।
दूतीयोगोद्भवरतां दूतीरूपां नमाम्यहम् ।।
क्रीं मन्त्रेण जलं जप्त्वा सप्तधा सेवनेन तु ।
सर्वरोगाः विनिश्यन्ति नात्र कार्या विचरणा ।।
क्रीं स्वाहान्तैर्महामन्त्रैश्चन्दनं साधयेत्ततः।
तिलकं क्रियते प्राज्ञैर्लोका वश्यो भवेत्सदा।।
क्रीं हूं ह्रीं मन्त्रजप्तेन चक्षतं सप्तभिः प्रिये ।
महाभय विनाशश्च जायते नात्र संशयः ।।
क्रीं ह्रीं ह्रीं स्वाहा मन्त्रेण श्मशाग्नि च मन्त्रयेत् ।
शत्रोर्गुहे प्रति क्षिप्त्वा शत्रोर्भृत्यर्भविष्यति ।।
हूं ह्रीं क्रीं चैव उच्चाटे पुष्पं संशोहय सप्तधा ।
रिपूणां चैव चोच्चाटं नयत्येव न संशयः ।।
आकर्षणे च क्रीं क्रीं जम्बाक्षतं प्रतिक्षिपेत् ।
सहस्त्र योजनस्थो च शीघ्रमागच्छति प्रिये ।।

क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं च कज्जलं शोधितं तथा ।
तिलकेन जगन्मोहं सप्तधाा मन्त्रमाचरेत् ।।

हृदयं परमेशानि सर्वपापहरं परम् ।
अश्वमेधादि यज्ञानां कोटि कोटि गुणोत्तरम् ।।
कन्यादानादि दानानां कोटि कोटि गुणं फलम् ।
दूतीयागादि यागानां कोटि कोटि फलस्मृतम् ।।
गङ्गादि सर्व तीर्थानां फलं कोटि गुणं स्मृतम् ।
एकदा पाठमात्रेण सत्यं सत्यं मयोदितम् ।।
कौमारी स्वेष्टरूपेण पूजां कृत्वा विधानतः ।
पठेत्स्तोत्रं महेशानि जींवमुक्तः स उच्यते ।।
रजस्वलाभगं दृष्टवा पठेदेकाग्रमानसः ।
लभते परमं स्थानं देवीलोके वरानने ।।
महादुखे महोरोगे महासंकटके दिने ।
महाभये महोघोरे पठेत्स्तोत्रं महोत्तमम् ।
सत्यं सत्यं पुनः सत्यं गोपयेन्मातृजारवत् ।।

इति काली हृदय समाप्तम् ।।

* * *

षष्ठी स्तोत्रम्

ॐ नमो देव्यै महादेव्यै सिध्यै शान्त्यै नमो नमः
शुभायै देवसेनायै षष्ठीदेव्यै नमो नमः ।।1।।
वरदायै पुत्रदायै धनदायै नमो नमः ।
सुखदायै मोक्षदायै षष्ठीदेव्यै नमो नमः ।।2।।
शक्तिषष्ठी स्वरूपायै सिद्धायै च नमो नमः ।
मायायै सिद्ध योगिन्यै षष्ठीदेव्यै नमो नमः ।।3।।
सारायै सारदायै च परायै सर्वकर्मणाम् ।
वालाधिष्टातृदव्यै च षष्ठी देव्ये नमो नमः ।।4।।
कल्याणदायै कल्याण्यै षष्ठीदेव्यै नमो नमः ।
फलदायै फलिन्यै च फलदायै च कर्मणाम् ।
प्रत्यक्षायै च भक्तानां षष्ठीदेव्यै नमो नमः ।।5।।
पूज्यायै स्कन्दकान्तायै सर्वषु सर्व कर्मसु ।
देवरक्षणकारिण्यै षष्ठीदेव्यै नमो नमः ।।6।।
शुद्धसत्व स्वरूपायै वन्दितायै नमो नमः ।
धनं देहि श्रियं देहि पुत्रं देहि सुरेश्वरी ।।7।।
धर्मदेहि यशोदेहि षष्ठीदेव्यै नमो नमः ।
देहिभूमिं प्रजांदेहि राज्यं देहि सुपूजिते ।
कल्याणञ्च जयं देहि षष्ठीदेव्यै नमो नमः ।।8।।
ॐ इति देवीञ्च संस्तूय लेभे पुत्रं प्रियव्रतः ।
यशस्विनञ्च राजेन्द्रं षष्ठीदेवी प्रसादतः ।।9।।
षष्ठी स्तोत्रमिदं ब्रह्मणा यः श्रृणोति दिने दिने ।
अपुत्रो लभते पुत्रं वरं सुचिर जीविनम् ।।10।।
वर्ष मेकञ्च यो भत्त्यया इदं स्तोत्रं श्रृणोति च।
सर्व पापछिनि मुक्तो महावन्द्या प्रसूयते ।।11।।
वीरपुत्रञ्च गुणिनं विद्यावन्तं यशस्विनम् ।
सुचिरायुष्मन्तमेव षष्ठी देवी प्रसादतः ।।12।।
इति ब्रह्मवैवर्ते महापुराणे नारायणनारद सम्वादे
प्रकृतिखण्डे षष्ठी स्तोत्रं सम्पूर्णम् ।।

ऋषिः
ह्रीं वी
अपराजि
ह्रीं
ध्यान
शेष
* हय

श्री विष्णु अपराजिता महाविद्या

अस्य श्री विष्णु अपराजिता महाविद्या माला मन्त्रस्य ईश्वर ऋषिः पङ्क्ति छन्दः श्री विष्णु अपराजिता देवता ॐ ह्रां ब्रां बीजं ह्रीं व्रीं शक्तिः ह्रूं ब्रूं कीलकं मम सर्वाभीष्ट सिध्यर्थ श्री विष्णु अपराजिता महाविद्या मालामन्त्र जपे विनियोगः ।

ॐ ईश्वर ऋषये नमः शिरसि।

पङ्क्तिश्छन्दसे नमः मुखे।

श्री विष्णु अपराजिता महाविद्या देवतायै नमः हृदि ।

ह्रां ब्रां बीजाय नमः गुह्ये।

ह्रीं ब्रीं शक्तये नमः पादयोः ।

ह्रूं ब्रूं कीलकाय नमः सर्वाङ्गे ।

ॐ ह्रां ब्रां	महाविद्यायै नमः	अंगु ।	हृदि
ॐ ह्रीं ब्रीं	महामायायै	तर्ज	शिरसि
ॐ ह्रूं ब्रूं	महामोहायै	मध्य	शिखायै
ह्रैं वैं	महामन्त्रायै	अनामि.	नेत्रत्रयाय.
ह्रौं ब्रौं	महासिद्धायै	कनिष्ठिः	कवचाय.
ह्रः व्रः	अपराजितायै	करतल. ।	अस्त्राय.

ॐ ह्रीं ब्रीं सर्वभूत निबार शाङ्गार्व सशरायास्त्र राजाय सुदर्शनाय हुं फट् ह्रीं ॐ स्वाहा ।। इति दिग्बन्धः ।

ध्यानम्-

चतुर्भुजां पीतवस्त्रां शंख चक्र गदा धराम् ।
मुक्ताभरणभूषाढ्यां पद्मनेत्रां द्विलोचनाम् ।
पीतगन्ध विलिप्ताङ्गीं पीताभरण भूषिताम्
पद्महस्तां सुपदमाङ्गीं गरूडासन संस्थिताम् ।
दैत्यदानव संहंत्री महाविष्णु वरप्रदाम् ।
एवं ध्यायेन्महाविद्यां विष्णु साम्राज्य दायिनीम् ।।

ॐ नमो भगवते वासुदेवाय नमोऽनन्ताय सहस्र शीर्षाय क्षीरोदार्णव शायिने शेष भोग पर्यङ्काय गरूडवाहनाय पीतवाससे वासुदेव संकर्षण प्रद्युम्न अनिरूद्ध हयशिशो वराह नरसिंह वामन

त्रिविक्रम राम राम वरप्रद नमोऽस्तुते नमोस्तुते ।। असुर दैत्य दानव यक्ष राक्षस भूत प्रेत पिशाच कूष्माण्ड सिद्धयोगिनी डाकिनी शाकिनी स्कन्द पुरोगमान्ग्रहान्नक्षत्र ग्रहाश्चान्यांश्च हन हन दह दह पच पच मथ मथ विध्वंसय विध्वंसय विद्रावय विद्रावय शंखेन चक्रेण वज्रेण गदया मुसलेन हलेन भस्मी कुरू सहस्र वाहवे सहस्रचरणायुध जय जय विजय विजय अपराजित अप्रतिहत सहस्रनेत्र ज्वल ज्वल प्रज्वल प्रज्वल विश्वरूप बहुरूप मधुसूदन महावराह महापुरूष वैकुण्ठ नारायण पद्मनाभ गोविन्द दामोदर हृषीकेश सर्वासुरोत्सादन सर्वभूत वशंकर सर्वदु:ख प्रभेदन सर्वयन्त्र प्रभञ्जन सर्वनाग प्रमर्दन सर्वदेव महेश्वर सर्वबन्ध विमोक्षण सर्वाहित प्रमर्दन सर्व ज्वरं प्रणाशन सर्वग्रह निवारण सर्वपाप प्रशमन जनार्दन जनानन्दकर नमोऽस्तुते स्वाहा ।।

इमां अपराजितां परं वैष्णवीं महाविद्यां जपति पठति स्मरति धारयति कीर्तयति न च तस्य वाय्वग्नि वज्रोपलाशनिवर्ष भयं न समुद्र भयं न ग्रहभयं न च चौरभयं न च श्वापद भयं वा भवेत् ।।

क्वचिद्रात्यन्धकार स्त्री राजकुल विषोपविष गरद वशीकरण विद्वेषोच्चाटन वध वन्धभयं वा न भवेदेतैर्मन्त्रपदैरूदाहृतैहृदावद्धैः संसिद्ध पूजितै ।।

तद्यथा –

नमो नमस्तेअस्तु अभये अनघे अजिते अत्रसिते अमृते अपराजिते पठित सिद्धे स्मरितसिद्ध एकानंशे उमे ध्रुवे अरून्धति सावित्रि गायत्रि जातवेदसि मानस्तोके सरसि सरस्वति धरणि धारिणि सौदामिनि अदिते विनते गौरिगांधारि मातङ्गि कृष्णे यशोदे सत्यवादिनि ब्रह्म-वादिनि कालि कापालिनि सद्योजात वचनकरि स्थलगतं जलगतमन्त-रिक्षगतं वा रक्ष रक्ष सर्वभूत भयोपद्रवेभ्यो रक्ष रक्ष स्वाहा ।।

यस्या: प्रणश्यते पुष्पं गर्भोवा पतते यदि ।
म्रियते वालकायस्या: काकवंध्या च या भवेत ।।
धारयेत इमां विद्यामेभिदोषै न लिप्यते ।
रणे राजकुले द्यूते नित्यंतस्यजयो भवेत् ।।
शस्त्रं धारयते ह्येषां समरे काण्ड धारिणी ।
गुल्म शूलाक्षि रोगाणां नित्यं नाशकरी तथा ।।
शिरोरोगज्वराणां च नाशिनी सर्व देहिनाम् ।।

तद्यथा-

हन ह
धम धम वि
हन दु:स्वप
मानसवेगे
विश्वेश्वरि
शर्वरि किरा
ये मां द्वि
तापय तापय
माहेश्वरि
विद्योते इ
कामाङ्कुशे
आकर्षिणि
रक्ष वायव्ये
आदित्यरश्मि
यथा मनीषि
भुव: स्वाह
प्रतिगच्छतु

इति

तद्यथा-

हन हन कालि सर सर कालि सर सर गौरि धम धम गौरि धम धम विद्ये आले ताले भाले गन्धे वन्धे पच पच विद्ये नाशय पापं हन दुःस्वप्नं विनाशय कष्ट नाशिनि रजनि सन्ध्ये दुन्दुभिनादे मानसवेगे शङ्खिनि चक्रिणि वज्रिणि शूलिनि अपमृत्यु विनाशिनि विश्वेश्वरि द्राविडि द्राविडि केशवदयिते पशुपतिमहिते दुर्दमदमिनि शर्वरि किराति मातङ्गि ॐ ह्रां ह्रैं ह्रैं ह्रैं क्रां क्रं क्रं क्रं त्वर त्वर ये मां द्विषन्ति प्रत्यक्ष परोक्षं वा सर्वान्दम सर्वान्दम मर्द मर्द तापय तापय पातय पातय शोषय शोषय उत्सादय उत्सादय ब्रह्माणि माहेश्वरि वाराहि विनायकि ऐन्द्री आग्नेयी चामुण्डे वारूणि प्रचण्ड विद्योते इन्द्रोपेन्द्रभगिनि विजये शान्ति स्वस्ति पुष्टि विवर्द्धिनि कामाङ्कुशे कामदुधे सर्वकाम वरप्रदे सर्व भूतेषु वासिनि प्रतिविद्यां कुरू कुरू आकर्षिणि वेशिनि ज्वालामालिनि रमणि रामणि धरणि धारिणि मानोन्मानिनि रक्ष रक्ष वायव्ये ज्वालामालिनि तापनिशोषणि नीलपताकिनि महागौर महाश्रेय महामयूरि आदित्यरश्मि जाह्नवि यमघन्टे किणि किणि चिन्तामणि सुरभि सुरोत्पत्रे कामदुध यथा मनीषितं कार्य तन्मम सिध्यन्तु स्वाहा ॐ स्वाहा ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ स्वाहा ॐ भूभुर्वः स्वाहा । अत्रैवाऽऽगतं पापं तत्रैव प्रतिगच्छतु स्वाहा । ॐ वले महावले असिद्ध साधिनि स्वाहा ॥

इति स्कन्दपुराणे महेश्वर खण्डे विष्णु अपराजिता महाविद्या सम्पूर्णम्

* * *

महाविद्या कवच (द्वितीय)

सदाशिव ऋषि देवि उष्णिक छन्दः उदीरितम् ।
विनियोगश्च देवेशि सततं मन्त्र सिद्धये ।।1।।
मस्तकं पार्वतीपातु पातु पञ्चानन प्रिया ।
केशं मुखं पातु चण्डी भारती रूधिरप्रिया ।।2।।
कण्ठं पातु स्तनं पातु कपालं पातु चैव हि ।
काली कराल वदना विचित्रा चित्र घण्टिनी ।।3।।
वृक्षोमूलं नाभिमूलं दुर्गा त्रिपुर सुन्दरी ।
समस्तं पातु मे तारा सर्वाङ्गी सर्वमेव च ।।4।।
विश्वेश्वरी पृष्ठदेशं नेत्रं पातु महेश्वरी ।
हृत्पद्मं कालिका पातु कण्ठं पातु नभोगतम् ।।5।।
नारायणी गृह्य देशं मेढ्र मेढ्रेश्वरी तथा ।
पादयुग्मं जयापातु नित्यं मां चण्डिकाऽवतु ।।6।।
जीवं मां पार्वती संपातु मातङ्गी पातु सर्वदा ।
छिन्ना धूमा च भीमा च भये पातु जले वने ।।7।।
कौमारी चैव वाराही नारसिंही यशो मम ।
पातु नित्यं भद्रकाली श्मशानालय वासिनी ।।8।।
उदरे सर्वदा पातु सर्वाणी सर्वमङ्गला ।
जगन्माता जयं पातु नित्यं कैलाश वासिनी ।।9।।
शिवप्रिया सुतं सपातु सुतं पर्वत नन्दिनी ।
त्रैलोक्यं पातु वगला भुवनं भुंवनेश्वरी ।।10।।
सर्वाङ्गं सर्व निलया पातु नित्यश्च पार्वती ।
चामुण्डा पातु मे रोमकूपं सर्वार्थ साधिनी ।।11।।
ब्रह्माण्डं मे महाविद्या पातु नित्यं मनोहरा ।
लिङ्गं लिङ्गेश्वरी पातु महापीठे महेश्वरी ।।12।।
सदाशिवप्रिया पातु नित्यं पातु सुरेश्वरी ।
गौरी मे सन्धिदेशश्च पातु वै त्रिपुरेश्वरी ।।13।।
सुरेश्वरी सदापातु श्मशाने च शनेऽवतु ।
कुम्भके रेचके चैव पूरके काममन्दिरे ।।14।।

कामाख्या कामनिलयं पातु दुर्गा महेश्वरी ।
डाकिनी काकिनी पातु नित्यं शाकिनी तथा ॥15॥
हाकिनी लाकिनी पातु राकिनी पातु सर्वदा ।
ज्वालामुखी सदा पातु मुखमध्यं शिवाऽवतु ॥16॥
तारिणी विभवे पातु भवानी च भवेऽवतु ।
त्रैलोक्यमोहिनी पातु सर्वाङ्ग विजनेऽवतु ॥17॥
राजकुले महाघाते संग्रामे रिपुसंकटे ।
प्रचण्डा साधकं माञ्च पातु भैरव मोहिनी ॥18॥
श्री राजमोहिनी पातु राजद्वारे विपत्तिषु ।
सम्पद्प्रदा भैरवी च पातु वालावलं मम ॥19॥
नित्यं मां शम्भुवनिता पातु मां त्रिपुरान्तका ।
इत्येवं कथितं रहस्यं सर्व कालिकम् ॥20॥
भुक्तिदं मुक्तिदं सौख्यं सर्व संपद प्रदायकम् ।
यः पठेत् प्रातरूत्थाय साधकेन्द्रो भवेद् भुवि ॥21॥
कुजवारे चतुर्दश्या ममायां मन्दवासरे ।
गुरौ गुरूं समभ्यर्च्च्या यः पठेत्साधकोत्तमः ॥22॥
स याति भवनं देव्याः सत्यं सत्यं न संशयः ।
एवं यदि वरारोहे पठेद् भक्ति परायणः ॥23॥
मन्त्रसिद्धिः भवेत्तस्य चाचिरान्नात्र संशयः ।
सत्यं लक्ष पुरश्चर्या फलं प्राप्य शिवो व्रजेत् ॥24॥
पठित्वा कवचं स्तोत्रं भुक्तिमाप्नोति निश्चितम् ।
पठित्वा कवचं स्तोत्रं दशविद्या यजेत यदि ॥25॥
विद्या सिद्धिः मंत्रसिद्धिः भवत्येव न संशयः ।
स्वरसिद्धिश्चितासिद्धिः दुर्लभा धरणी तले ॥26॥
अयत्न सुलभ सिद्धिस्ताम्बूलान्नात्र संशयः ।
निशामुखे निशायाञ्चा महाकाले निशान्तके ॥27॥
पठेद् भक्त्या महेशानि गाणपत्यं लभेत्तु सः ॥28॥

इति मुण्डमाला तन्त्रे एकादश पटले महाविद्या कवचं सम्पूर्णम ॥

* * *

पद्मावती कवच

भगवन् सर्वमाख्यातं मन्त्र यन्त्रं शुभप्रदम् ।
पद्मायाः कवचं देवि यद्यहं तव वल्लभः ॥1॥
महागोप्यं महागुह्यं पद्माया सर्व कामदम् ।
कंवचं मोहनं देवि गुरूभक्ताय दीयते ॥2॥
राज्यं देयं च सर्वस्वं कवचं न प्रकाशयेत् ।
गुरूभक्ताय दातव्यमन्यथा सिद्धिदं न हि ॥3॥
ऐं वीजं क्लीं शक्तिः ह्सौ कीलकम् ।
पद्मावती प्रीत्यर्थ जपे विनियोगः ॥4॥
ॐ पर ब्रह्मणे नमः शिरसि ।
अनुष्टुप छन्दसे नमः मुखे ।
श्री पद्मावती शक्ति देवतायै नमः हृदि ।
आं वीजाय नमः कण्ठें ।
ह्रीं शक्तये नमः गुह्ये ।
क्रों कीलकाय नमः पादयोः ।
श्री पद्मावती कवच सिध्यर्थे विनियोगाय नमः सर्वाङ्गे ।
आं पद्माबीज शिरः पातु ललाटं पञ्चमी परा ।
नेत्रे कामप्रदा पातु मुखं भुवन सुन्दरी ॥5॥
नासिकां नागनाथश्च जिव्हां वागीश्वरी तथा ।
श्रुतिरूपा जगद्धात्री करौहृत हिमवासिनी ॥6॥
उदरं मोहदमनी कुण्डली नाभिमण्डलम् ।
पार्श्व पृष्ठं कटिंगुह्य शक्तिस्थान निवासिनी ॥7॥
उरू पृष्ठौ तथा पादौ सर्वविघ्न विनाशिनी ।
रक्ष रक्ष महामाये पद्मे पद्मालये शिवे ॥8॥
वाञ्छितं पूरयत्याशु पद्मा सा पातु सर्वतः ।
इदं तु कवचं देव्याः यो जानाति स मन्त्रवित् ।
राजद्वारे श्मशाने च भूत प्रेतोपचारके ॥9॥
वन्धने च महादुःखे भये शत्रु समागमे ।
स्मरणात् कवचस्यास्य भयं किंचिन्न जायते ॥10॥

प्रयोगमुपचारं च पद्माया कर्तुमिच्छति ।
कवचं प्रपठेदादौ ततः सिद्धिमवाप्नुयात् ।।11।
भूर्जपत्रे लिखित्वा तु कवचं यस्तु धारयेत् ।
देहे च यत्र कुत्रापि सर्वसिद्धि भवेत् ध्रुवम् ।।12।।
शस्त्राग्निजं भयं चैव भूतादि भय नाशनम् ।
गुरूभक्तिं समासाद्य पद्माया स्तवनं कुरू ।।13।।
वन्दिना कथितं देवि तवाग्रे तत प्रकाशितम् ।
साङ्गता जायते सिद्धि नान्यथा गिरिनन्दिनी ।।14।।
इदं कवचमज्ञात्वा पद्मायाः स्तौभि यो नरः ।
कल्पकोटि शते जापिन भवेत् सिद्धि दायिनी ।।15।।

इति भैरव पद्मावती कल्पे पद्माया पद्म कवच सम्पूर्णम् ।।

* * *

मोहिनी स्तोत्र

सर्वेन्द्रियाणां प्रवरं विष्णोरसं च मानसं
तदेव कर्माणां वीजं तदुद्मव नमोस्तुते ।।1।।
स्वयमालाहि भगवन् ज्ञान रूपा महेश्वर
नमो ब्रह्म जगत्स्रष्टा तदुद्मव नमोस्तुते ।।2।।
सर्वाजित् जगज्जेता जीव जीव मनोहर
रति विजरति स्वामिन् रतिप्रिय नमोस्तुते ।।3।।
शश्वघोषि दधिष्टान योषित्प्राणाधिका प्रिया ।
योषिद्वाहन योषास्त्र योषिद्वन्द्यो नमोस्तुते ।।4।।
प्रतिसाद्यकराशेष रूपाधार गुणाश्रय ।
सुगन्धिवातसचिव मधुमित्र नमोस्तुते ।।5।।
शश्वधानिकृता धारस्त्री सन्दर्शन् वर्द्धन ।
विदग्धानां विहरिणां प्राणान्तक नमोस्तुते ।।6।।
अकृयायेषुतेनर्थस्तेषां ज्ञान विनाशनं ।
अनूहरूप भक्तेषु कृपासिन्धो नमोस्तुते, ।।7।।
तपस्विनां च तपसां विघ्नवीजावलीलया ।
मनः सकामं मुक्तानां कर्तुशशु नमोस्तुते ।।8।।
तपसाध्याश्चाराध्याश्च सदैव पाञ्चभौतिकाः ।
पञ्चेन्द्रिय कृताधार पञ्चबाण नमोस्तुते ।।9।।
मोहिनी सेव मुक्त्वातु मनसासाविधेः पुरः ।
विररामनम्रवक्रावभूवध्यानतप्रस ।।10।।
उत्तुंमध्यन्दिनेकान्ते स्तोत्रमेतन्मनोहरं ।
पुरा दुर्वाससादत्तं मोहिन्यै गन्धामादेन ।।11।।
स्तोत्रमेतन्महापुण्यं कामी भक्त्या यदा पठैत।
अभीष्ठलभते नूनं निस्फलको भवेद् ध्रुवम् ।।12।।
चेष्टा च कुरूते कामः कदाचिदपितं प्रियं ।
भवेदरोगी श्रीयुक्तः कामदेव समप्रभः ।।13।।

इति सम्मोहनतन्त्रे मोहिनी स्तोत्रं सम्पूर्णम् ।।

* * *

वश्य वाराही स्तोत्र

अस्य श्री सर्व वशीकरण स्तोत्र मन्त्रस्य नारद ऋषिः अनुष्टुप छन्दः श्री वश्य वाराही देवता ऐं बीजं क्लीं शक्तिः ग्लौं कीलकं मम सर्ववश्यार्थे जपे विनियोगः ।

नारद ऋषये नमः शिरसि ।
अनुष्टुप छन्दसे नमः मुखे ।
वश्य वाराही देवतायै नमः हृदि।
ऐं बीजाय नमः गुह्ये ।
क्लीं शक्तये नमः पादयोः ।
ग्लों कीलकाय नमः सर्वाङ्गे ।

हृदिन्यासः	करन्यास	
ॐ ऐं सर्ववश्य वाराह्यै नमः ।	अंगु.	हृदि.
ॐक्लीं सर्ववश्य वारह्यै नमः	तर्ज.	शिरसे.
ॐग्लौं सर्ववश्य वाराह्यै नमः	मध्य.	शिखायै.
ॐऐं सर्ववश्य अश्वारूढे ।	अना.	कवचाय.
ॐ क्लीं सर्ववश्य वाराह्यै ।	कनि.	नेत्रत्रयाय.
ॐ ग्लौं ममसर्ववशंकरि कुरू कुरू ठः ठः	करतल कर.	अस्त्राय.

ध्यानम् -

तारे तारिणि देवि विश्वजननि प्रौढप्रतापान्विते ।
तारे दिक्षु विपक्ष यक्ष दलिनि वाचा चला वारूणी ।।
लक्ष्मीकारिणि कीर्तिधारिणि महा सौभाग्य संदायिनि ।
रूपंदेहि यशश्च सततं वश्यं जगत्यावृतम् ।।

मन्त्रः- ॐ ऐं क्लीं ग्लौं अश्वारूढे सर्ववश्य वाराह्यै
मम सर्ववशंकरि कुरू कुरू ठः ठः ।।
मानसोपचारैः सम्पूज्य

स्तोत्र-

अश्वारूढे रक्तवर्णे स्मितसौम्यं मुखाम्बुजे ।
राज्यस्त्री सर्वजन्तूनां वशीकरण नायिके ।।1।।
वशीकरण कार्यार्थ पुरा देवेन निर्मितं ।
तस्माद् वश्य वाराही सर्वान्मे वशमानय ।।2।।
यथा राजा महाज्ञानं वस्त्रं धान्यं महावसु ।
मह्यं ददाति वाराहि यथात्वं वशमानय ।।3।।
अन्तर्वहिश्च मनसि व्यापारेषु सभाषु च ।
यथा मामेवं स्मरति तथा वश्यं वशं कुरू ।।4।।
चामरं दोलिकां छत्रं राज चिह्नानि यच्छति ।
अभीष्ठं सम्प्रदोराज्यं यथा देवि वशं कुरू ।।5।।
मन्मथस्मरणाद्रामा रतिर्यातु मयासह ।
स्त्री रत्नेषु महत्प्रेम तथा जनय कामदे ।।6।।
मृगं पक्ष्यादयाः सर्वे माँ दृष्टवा प्रेममोहिताः ।
अनुगच्छति मामेव त्वत्प्रसादाद्दयां कुरू ।।7।।
वशीकरण कार्यार्थ यत्र यत्र प्रयुञ्जति ।
सम्मोहनार्थ वर्द्धित्वात्तत्कार्य तत्र कर्षय ।।8।।
वशमस्तीति चैवात्र वश्य कार्येषु दृश्यते ।
तथा मां कुरू वाराही वश्य कार्य प्रदर्शय ।।9।।
वशीकरण बाणास्त्रं भक्त्यापद्धि निवारणम् ।
तस्मात् वश्यं वाराही जगत्सर्व वशं कुरू ।।10।।
वश्यस्तोत्रमिदं देव्या त्रिसन्ध्यं यः पठेन्नर ।
अभीष्ठं प्राप्नुयाद्भक्तो रमां राज्यं यथापिवः ।।11।।

इति अथर्वशिखायां वश्यवाराही स्तोत्रं सम्पूर्णम् ।

* * *

मातङ्गी स्तोत्र

नमामि वरदां देवीं सुमुखीं सर्वसिद्धिदाम् ।
सूर्यकोटिनिभां देवीं वह्निरूपां व्यवस्थिताम् ।।1।।
रक्तवस्त्र नितम्वां च रक्तमाल्योपशोभिताम् ।
गुंजाहारस्तनाद्यान्तां परं ज्योति स्वरूपिणीम् ।।2।।
मारणं मोहनं वश्यं स्तंभनाकर्ष दायिनी ।
मुण्ड कर्त्रि शरावामां परं ज्योति स्वरूपिणीम् ।।3।।
स्वयम्भुकुसुम प्रीतां ऋतुयोनि निवासिनीं ।
शवस्थां स्मेरवदनां परंज्योति स्वरूपिणीम् ।।4।।
रजस्वला भवेन्नित्यं पूजेष्ट फलदायिनी ।
मद्यप्रियं रतिमयीं परं ज्योति स्वरूपिणीम् ।।5।।
शिव विष्णु विरञ्चिनां साद्यां बुद्धि प्रदायिनीं ।
असाध्यं साधिनीं नित्यां परं ज्योति स्वरूपिणीम् ।।6।।
रात्रौं पूजा बलियुतां गोमांस रूधिरप्रियां ।
नानालङ्कारिणीं रौद्रीं पिशाच गण सेवितां ।।7।।
इत्यष्टकं पठेद्यस्तु ध्यानरूपां प्रसन्नधीः ।
शिवरात्री व्रतेरात्रौ वारूणी दिवसेऽपिवा ।।8।।
पौर्णमास्यांममावस्यां शनि भौम दिने तथा ।
सततं वा पठैद्यस्तु तस्य सिद्धि पदे पदे ।।9।।

इति एकजटा कल्पलतिका शिवदीक्षायान्तर्गत मातङ्गी स्तोत्रं सम्पूर्णम् ।।

* * *

कुण्डलिनी स्तोत्र

ॐ नमस्ते देव देवेशि योगीश प्राणवल्लभे ।
सिद्धिदे वरदे मातः स्वयंभूलिग वेष्टिते ।।1।।
ॐ प्रसुप्त भुजगाकारे सर्वदा कारणप्रिये ।
कामकलान्विते देवि ममाभीष्टं कुरूष्व च ।।2।।
असारे घोर संसारे भवरोगात् कुलेश्वरी ।
सर्वदा रक्ष माँ देवि जन्म संसार सागरात् ।।3।।
इति कुण्डलिनि स्तोत्रं ध्यात्वा यः प्रपठेत् सुधीः ।
मुच्यते सर्व पापेभ्यो भव संसार रूपके ।।

इति प्राणतोषिणी तन्त्रे कुण्डलिनी स्तोत्रं सम्पूर्णम् ।।

* * *

अन्नपूर्णा स्तोत्र

भगवति भवरोगात् पीडित दुष्कृतोत्थात्
सुतदुहित कलत्रोपद्रवेणानुयातम् ।
विलसतमृत दृष्ट्या वीक्ष्यविभ्रान्त चित्तम्
सकलभुवनमातस्त्राहि मामों नमस्ते ॥1॥
माहेश्वरीमाश्रित कल्पवल्ली -
महं भवोच्छेदकरी भवानीम् ।
क्षुधार्त्तजाया तनयाद्युपेत-
स्त्वामन्नपूर्णे शरणं प्रपद्ये ॥2॥
दारिद्र्यदावानल दह्यमानं
पाह्यम्वपूर्णे गिरिराजकन्ये ।
कृपाम्बुधौ मज्जय माँ त्वदीये
त्वत्पादपद्मार्पित चित्त वृत्तिम् ॥3॥
इत्यन्नपूर्णा स्तुतिरत्नमेतत्
श्लोकत्रयं यः पठतीय भक्त्या ।
तस्मै ददात्यन्नं समृद्धिमम्बा
श्रियं च विद्यां च यशश्च भुक्तिम् ॥4॥

इति श्री विद्यार्णव तन्त्रे अन्नपूर्णा स्तोत्रं सम्पूर्णम् ॥

* * *

मन्त्रोत्कीलन विमोचन स्तोत्र

अस्य श्री सर्वमन्त्रोत्कीलन मंत्रस्य मूलप्रकृति पुरूष ऋषि अनुष्टुप जगती छन्दः श्री महाविद्या देवता निरंकारा मायाशक्तिः ह्रीं ह्रीं वीजं क्रौं कीलकं मम क्रियमाण संचित जन्म मरण सर्वमन्त्रोत्कीलन- शाप विमोचनं द्वारा धर्मार्थकाममोक्षार्थे जपे विनियोगः ।

न्यासः -

ह्रीं वीजोत्कीलनं	अंगुष्ठाभ्यां	नमः	हृदयाय	नमः
श्रीं मन्त्रोत्कीलनं	तर्जनीभ्यां	,,	शिरसे	स्वाहा
क्लीं देवोत्कीलनं	मध्यमाभ्यां	,,	शिखायै	वषट्
ऐं शक्त्यात्कीलनं	अनामिकांभ्यां	,,	कवचाय	हुम्
सौः छन्दोत्कीलनं	कनिष्ठिकाभ्यां	,,	नेत्रत्रयाय	वौषट्
क्रौं ऋष्योत्कीलनं	करतलकरपृष्ठाभ्यां	,,	अस्त्राय	फट्

ध्यानम् -

चिन्तयन्तीं चैतन्यरूपां ब्रह्मवीजा मानन्दकन्दाम्
सर्वान्तरांश चेतयन्तीं तारयन्तीं तां मन्त्रजालैं :
चेतयन्तीं प्रकृतिपुरूष वीजमखिलं संजीवनी
मन्त्र यन्त्रोत्कीलनी सर्वमन्त्रशाप विमोचयन्ती ।।

स्तोत्र -

अं आं ब्रह्म इं ई स्व रूपी एं ऐं उत्कीलनी विमुंचती ।
अं अः प्रकाशयन्ती मम मनास्तु सर्वमन्त्र सिद्धि प्रदायिनी ।।
यथा च वर्ण रूपाणि नाम कर्मात्मिका परा ।
त्वयैत्सृज्यते सर्व पाल्यते च तथैव च ।।
सृष्टि स्थितिकरी चैव सर्वप्रलयकारिणी ।
निरंजनस्य देवस्य नाम कर्म विधायिनी ।।
वद्धो विमुच्यते सर्व त्वयैव ब्रह्मरूपिणी ।
त्वमाद्यानन्त शक्तीनां प्रवाहो जायते तया ।
सस्मृतापूजिताऽनन्ता योगिनामपि सिद्धिदा ।
त्वयाव्रह्मविरिञ्चाद्या भ्रमन्ते निज कर्मणा ।

तथैव च महाविष्णुः सर्वदेवस्तुति ततः ।
सा तुष्टा सर्व मन्त्राणां मृतानां चेतनी सदा ।।
मृतसञ्जीवनीशम्भो प्रसादाच्छुक्र सिद्धिदा ।
ब्रह्माण्डं चेतयन्ती विविध सुरगणान् प्रमोदैः प्रीताः
सन्दीपयन्ति निजगुण विततैः षड्गुणान् प्रेरयन्ती ।
वर्णान्देवान् जयन्ती दितिसुत दमनी साप्य हुंकार कार्त्री
क्षेत्री तस्यैव जाप्यं स्वर विततनुतां मोचयेच्छाय जातं ।।
इदं महात्रिपुर सुन्दरी स्तोत्रं पठेत् भक्त्यास्तु यो नरः ।
सर्वान्कामानवाप्नोति सर्वसिद्धिः भवेत् ध्रुवम ।।

इति शिव रहस्ये पञ्चरात्रे मधयम संहितायां
शिवशक्ति सम्वादे शैव वैष्णव शक्ति सौर गाणपत्य
मन्त्रोत्कीलन विमोचन स्तोत्रं सम्पूर्णम् ।।

* * *

धनदा कवच

श्री देव्युवाच - धनदाया महाविद्या कथितान् प्रकाशिता ।
इदानीं श्रोतुमिच्छामि कवचं पूर्व सूचितम् ।।1।।
श्री शिव उवाच- श्रृणु देवि प्रवच्छामि कवचं मन्त्रविग्रहं ।
सारात्सारतरं देवि कवचं मन्मुखोदितम् ।।2।।
धनदा कवचस्यास्य कुबेर ऋषिरीरितः ।
पङ्क्तिच्छन्दो देवतेच धनदा सिद्धिदा सदा ।।3।।
धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ।
धं वीजं मे शिरः पातु ह्रीं वीजं मे ललाटकं ।।4।।
श्रीं वीजं मे मुखम्पातु रकारं हृदि मेऽवतु ।
तिकारं पातुजठरं प्रिकारं पृष्ठतोऽवतु ।।5।।
येकारं जंघयोर्युग्मे स्वाकारं पृष्ठतोऽवतु ।
शीर्षादि पाद पर्यन्तं हकारं सर्वतोऽवतु ।। 6।।
इत्येतत्कथितं कान्ते कवचं सर्वसिद्धिदं ।
गुरूमभ्यर्च्य विधिवत्कवचं प्रपठेद्यदि ।।7।।
शतवर्ष सहस्त्राणां पूजायाः फलमाप्नुयात् ।
गुरूपूजां विनादेवि नहि सिद्धि प्रजापते ।।8।।
गुरूपूजा परोभूत्वा कवचं प्रपठेत्तमः ।
सर्वसिद्धि युतोभूत्वा विचरेद्भैरवो यथा ।।9।।
प्रातःकाले पठेद्यस्तु मन्त्रजाप पुरः सरं ।
सोऽभीष्ट फलमाप्नोति सत्यं सत्यं न संशयः ।।10।।
पूजाकाले पठेद्यस्तु देवीं ध्यात्वा हृदाम्बुजे ।
षण्मासाभ्यन्तरे सिद्धि नात्र कार्या विचारणा ।।11।।
सायंकाले पठेद्यस्तु स शिवो नात्र संशयः ।
भुर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि ।।12।।
पुरूषो दक्षिणे वाहौ योषिद्वाम भुजे तथा ।
सर्वसिद्धि युतो भूत्वा धनवान्पुत्रवान्भवेत् ।।13।।
इदं कवचमज्ञात्वा यो जपेद्धनदां शुभे ।
स शस्त्रघातमाप्नोति सोऽचिरान्मृत्युमाप्नुयात् ।।14।।
कवचेनावृतो नित्यं यत्र यत्रैव गच्छति ।
तत्र तत्र महादेवि सम्पूज्यो नात्र संशयः ।।15।।
इति गुप्त साधन तन्त्रोक्त धनदा कवच सम्पूर्णम ।।

* * *

धनदा स्तोत्र

अथातः संप्रवच्छामि धनदा स्तोत्रमुत्तमम् ।
यथोक्तं सर्वतन्त्रेषु यदानीं तत्प्रकाशितम् ॥1॥
नमः सर्वस्वरूपेण नमः कल्याणदायिके ।
महासम्पदप्रदा देवि धनदायै नमोस्तुते ॥2॥
महाभोगप्रदे देवि महाकाम प्रपूरिते ।
महामोक्ष प्रदे देवि धनदायै नमोऽस्तुते ॥3॥
ब्रह्म रूपे सदानन्दे सदानन्द स्वरूपिणि ।
द्रुतसिद्धिप्रदे देवि धनदायै नमोस्तुते ॥4॥
उद्यत्सूर्य प्रकाशाभे उद्यदादित्य मण्डले ।
शिवतत्व प्रदे देवि धनदायै नमोस्तुते ॥5॥
विश्वरूपे विश्वमते विश्वपालन कारिणी ।
महासत्व गुणाक्रान्ते धनदायै नमोस्तुते ॥6॥
शिवरूपे शिवानन्दे कारणानन्द विग्रहे ।
विश्वसंहार रूपे च धनदायै नमोस्तुते ॥7॥
पञ्चतत्व स्वरूपे च पञ्चाचार सदारते ।
साद्याभीष्टदे देवि धनदायै नमोस्तुते ॥8॥
इदं स्तोत्रं मया प्रोक्तं साधकाभीष्ट दायकं ।
यः पठेत्पाठयेद्वापि स लभेत्सकलं फलम् ॥9॥
त्रिसंध्यं यः पठेन्नित्यं स्तोत्रमेतत्समाहितः ।
स सिद्धिं लभते शीघ्रं नात्र कार्या विचारणा ॥10॥
इदं रहस्यं परमं स्तोत्रं परम दुर्लभम् ।
गोपनीयं प्रत्यत्नेन स्वयोनिरिव पार्वति ॥11॥
अप्रकाश्यमिदं देवि गोपनीय परात्परं ।
प्रपठेन्नात्र सन्देहो धनवान्जायतेऽचिरात् ॥12॥

इति गुप्त साधन तन्त्रोक्त धनदा स्तोत्रं सम्पूर्णम् ॥

* * *